No 1

BRIHADARANYAKOPANISHAD

218

बृहदारण्यक उपनिषद् ; अपूर्ण
असं० पत्रक ॥ ल० म० १० पं० प्र० पृ०

ह०ल०

श्री

देति सदा सर्वकालेषु अतिथीनां दूरमार्गश्रमखिन्नानां तुच्छकुलानां ग्रीशानां स्वधर्मोपार्जित
वित्तानुसारं जलस्थलान्नपानशय्यासुभाषितैः स्वागतं कुशलीकरोति तदेव भाग्यं तमेव भजंति ते
तेषां जन्मान्तरे होमयागयपदं हविःसु नृपानतिथीन् पूजयामि नौमीत्यर्थः उक्तं च ब्रह्मनारदीये ॥
आश्रमाचारनिरतास्स्वधर्मैवातिथिपूजकाः ये च वेदार्थवक्तारस्ते वै भागवतोत्तमा इति अतिथि
यिस्वरूपमाह मार्कंडेयेन मित्रमतिथिं कुर्यान्नैकग्रामनिवासिनं अज्ञातकुलनामानं तत्का
ले समुपस्थितं बुभुक्षमागतं श्रांतं याचमानमकिंचनं अज्ञातकुलनामानं तत्काले स
मु ब्राह्मणं प्राहुरतिथिं संपूज्यः यांछितो वधैरिति शक्तितः सुक्ते जलमन्नमित्रमाराध्य ग्रासत्र
यं च तथा च पराशरवचनं दद्याद्भिक्षात्रितयं परिव्राड्ब्रह्मचारिणोः इच्छया च ततो दद्याद्विभे
वे सत्यवारितमिति भिक्षात्रितयं ग्रासत्रयमिति ग्रासमात्रं भवेद्भिक्षेति मनुवचनात् क्षुधितो
दूरादागतो ऽतिथिकोप्यस्तु इति सिद्धं तथा च याज्ञवल्क्यः अतिथित्वेन वर्णानां देयं शक्त्यानुपू

६७ र्वेदाः अप्रतो धोतिप्रिः सायमपि वाग्मन्त्रातो द्वैकैरिति वर्त्तान्नापि स्तुके नतुर्त्तीपरिग्रहइति नु
नु चैतग्रहस्यानां विषयमिति चेत्सत्य अग्रहस्यास्तावत्पारिशाध्याद्विगंबराः नतुसंबधिनः
तत्रापि अवधूतानां देहाभिमानारहितानामेवेष्टिः पुनः कीदृशान् गुरोरुपदेष्टुः आचार्यवा
न्पुरुषो वेद इतिश्रुतेः तस्मात् श्रीराम् गुरुचरणकेलतयोर्विलासः विलसत्वस्मिन्निति वि
लासो मकरंदः तत्र भृंगाः भृंगा इव ये भृंगास्तान् यद्वा गुर्वोः मातापित्रोः चरणकमलोपास
कान् उक्तं चेतरहस्ये मातापित्रोश्च शुश्रूषां ये कुर्वंति नरोत्तमाः गंगाविश्वेश्वरं ध्यायंते वै
भागवतोत्तमा इति पुनस्तानाह अविद्धानि व्रतानि विद्धव्रतानि तत्र विद्धं स्यासां काचित्तो वे ६७
धातान् तत्राविद्धानि दशम्यादि भेदस्तीतानि एकादश्युपासादीनि तत्र वेधोविचार्यते तत्रैकाद
शी द्विधा विद्धाऽविद्धा च तत्राविद्धा द्विधा अरुणोदयव्यापिनी निशीथव्यापिनी च तत्र वेधस्वाना
मुभयत्र विधिः स्वस्वगुरु परंपरानुसारात् तत्रारुणोदयव्यापिन्या वचनानि तत्र अविद्धास्वरु

पमाह उदयास्त्राक्तु यदा विप्र मुहूर्त्तद्वयसंयुता संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही तिगा
रुडसौरधर्मादिवचनमिति व्यतिरेके दोषमाह ॥ गारुडे दशमीदोषसंयुक्तो यदि स्यादरु
णोदयः नैवोपोष्यं वैष्णवेन तद्दिने त्वेकादशीव्रतमिति नारदीये च लववेधोऽपि विप्रेंद्र दशम्यै
कादशीं त्यजेत् सुरायाविंदुना स्पृष्टं गंगाभइव निर्मलं सांदिचकलाकाष्ठादि गस्तेव दशमैते
दशमीविद्धो एकादश्यां न कर्त्तव्यं व्रतं राजन् कदाचन इति अरुणोदयइत्यस्य व्यापारः अरुणोदयां पवेला ५
देवगांधारी भवेद्यदि दुष्टं तत्तु प्रयत्नेन वर्जनीयं नराधिप इति वाक्यांतरः ननु किं नामारुणोदय
इत्यत्रारुणोदयो निर्णीयते अत्रैके च सार्द्धत्रय घटिकायामरुणोदयं वदंति निशाः प्रांते
तु यामार्द्धं दैवावादित्यवायने सारस्वतानध्ययने चारुणोदय उच्यते तस्य चार्द्धयामग्रहणेन
षड्विंशति घटीरात्रिमाने सार्द्धत्रयघटिकारुणोदयः संभवति तत्र उदयात्प्राक्चतस्रस्तु घ
टिका अरुणोदय इत्यरुणोदयप्रतिपादनात् न चायं पक्षांतं भ्राद्वृद्धीरात्रिपरीयमिति वास्यम् ॥

६८

68

वृतादौ तु चतुर्घटिकापरिग्रहात् उक्तं तु ब्रह्मवैवर्ते चतस्रो घटिकाः प्रातररुणोदयनिश्चयः
चतुष्टयविभागोऽत्र वेधादीनां किलोदित इति अरुणोदयवेधः स्यात्सार्द्धं तु घटिकात्रयमि
तु किन्तु केनाप्यर्द्धघटीदोषमल्पं कुर्वता किमनेन व्रतहानिः र्भविष्यतीत्यनादरेणाव्रतावि
षिराख्यातः तदर्थं अरुणोदयवेधः स्यात्सार्द्धं तु घटिकात्रयमिति नारदस्तीयोयं पक्षः प्र
स्मात् लववेधेपि विद्धेऽदशाम्येकादशीं त्यजेत् सुरायाविंदुनास्पृष्टं गंगांभ इव निर्मलमिति
नारदीये अप्रवायमर्थः लववेधोपि न सोढव्यः किं तावदर्द्धघटिकायाः प्रसंगः माधवोप्यतेदेवा
ह सोयं कलादिवेधोऽरुणोदयवेधे सूर्योदयवेधे च समान इति निगमोपि सर्वप्रकारवेधाय मु
पवासस्य दूषक इति ननु यद्याके मुतिकन्यायेन सार्द्धं तु घटिकात्रयमित्यनेन न चतुर्घटिकारु राम॰
णोदयपरं तथैवान्यत्र तयान्यत्रे वमनवस्थाप्रसंगो दुर्वार इति चेत्सत्यं कापालिकानां निशी ६८
यातमदोषा न द्वै मनवस्थायाः प्रसंभवात् निशीथस्यावधिभूतत्वेन प्रतिपादनात् अरुण

स्उचतुष्पस्यैवावधिम् तत्वेनानवस्थानवकाशः ब्रह्मवैवर्त्तवचनात्साधितत्वात् आदित्यो
दयवेलायाः प्राग्मुहूर्त्तद्वयान्विता एकादशीतु संपूर्णा विद्धान्यापरिकीर्त्तितेति भविष्योक्ता
द्वतात् ननु संपूर्णत्वंतु सूर्योदयात्सूर्योदयांतमावेद्यते तत्किमित्यरुणोदयादारभ्यो च्य
ते उच्यते तत्रुत्यैकादशीमं तेरेण प्रतिपादनात् तथाच स्कंदपुराणोक्तं वाक्यम् प्रतिपत्प्रभृ
तयः सर्वा उदयादोदयाद्रवेः संपूर्णा इति विख्याता हरिवासर [illegible] वर्जिताः अतस्त्वनु घटि
काघटितारुणोदयव्यापिन्येकादशी ग्राह्या तदुक्तं स्कान्दे प्रायश्चित्तश्रवणात् तथाहि अरुणा
घटिका मोहात्कुर्वन्नेकादशीव्रतं दशमीशेषसंयुक्तं प्रायश्चित्तमिदं चरेत् कृष्णपादं नरस्य वर्गांग
वरद्यात्सवज्रसकास्य सुवर्णस्याढकं देयं तिलद्रोणसमन्वितं चेति हेमाद्रौ वेधतारतम्यात् दोषतार
तम्यं दोषतारतम्यात् प्रायश्चित्ततारतम्यं एवं गम्यते चतुर्विधारुणवेधस्तविद्धा निरूपितो माधवः
अथ वैष्णवानां निशीथव्यापिनां विधिराम्नायते स्कांदे स्कंदं प्रतिरुद्रवाक्यं एकादशीपरात्युक्त

६ये

69

चतुर्वेधविवर्ज्जिता प्रकर्तव्याव्रयत्नेन चतुर्वर्गफलप्रदेति ननु चतुर्वेधविवर्जितेत्यत्रारुणोदय
चतुर्वेधाग्रास्येति चेत्तन्न तद्भिन्नत्वेन प्रतिपादनात् भेदानाह गंधिनी च शल्या च वेधा च पंच चत्वारि
ग्रासस्ग्रासः संगः पंच शता मतः पंच पंचाशता शल्यो वेधः षष्टं शतामतेति स्पर्शेत्तु घटिका
पंच पंच संगे तथैव च शल्ये पंच तथा वेधे एवं वेधश्चतुर्विधिस्पर्शादौ वेधश्चतुरो वर्जयेद्देस्म
वोनरइति गंधिनी संगिनी शल्या वेधा लोकेषु विश्रुता गंधिनी संगिनी शल्या चतुर्थी वेध
संयुतास्त्वंसत्यंपुनः सत्य न कर्तव्यं कदाचन गंधिनी धर्महीना च अर्थहीना च संगिनी का
मविध्वंसिनी शल्या वेधा मोक्षविनाशिनीति विष्णुधर्मोत्तरे मार्कंडेयवचनानि कलौ प्राप्तेतु. राम.
निश्चेष्टमहावेधं चतुर्विधं साहंकारा न पश्यंति आसुरं भावमाश्रिता. यशीदे चतुरो रोपानपश्यं ६ये
तिनराधमा ख्यातानतिमिरांधास्ते सुकमायो विमोहिता इति रुद्रप्रोतपादनात् ब्रह्मवैवर्त्तेपि

अथास्यनामसेयंकरोतिवेदोसीतितदस्यतद्गुह्यंनामभवतिवेदइतिअथैनंमात्रेप्रदायस्तनंप्रयच्छतियस्तेस्तनइत्यादि
मंत्रेणाअथास्यमातरमभिमंत्रयतेइलासीत्यनेनततोवाएतस्माद्दारितनेनविधिनाजातपुत्रःपितरंपितामहंवाअतिशेतेइ .

अथास्यनामकरोतिवेदोसीतितदस्यतद्गुह्यमेवनामभवति।अथैनंमात्रेप्रदायस्तनंप्रयच्छतियस्तेस्तनःशश
योयोमयोभूर्यैरत्नधावसुविद्यःसुदत्रः।येनविश्वापुष्यसिवार्याणिसरस्वतितमिहधातवेकरिति।अथास्यमातर
मभिमंत्रयतेइलासिमैत्रावरुणीवीरेवीरमजीजनत्सात्वंवीरवतीभवयास्मान्वीरवतोकरदितितंवाएतमाहुर
तिपिताभूरतिपितामहोवताभूःपरमांवतकाष्ठांप्रापच्छ्रियायशसाब्रह्मवर्चसेनयएवंविदोब्राह्मणस्यपुत्रोजाय
तइति चतुर्थं ब्राह्मणं १० ॥

तिश्रियायशसाब्रह्मवर्चसेनपरमांनिष्ठांप्रायदित्येवंरूपोभवतीत्यर्थः।यस्यचैवंविदोब्राह्मणस्यपुत्रोजायतेसचैवंरूपो
भवतीत्याध्याहार्यं॥ ॥अष्टमस्यचतुर्थंब्राह्मणं॥ १० ॥ छ ॥ छ ॥

बृ० टी० अथेदानीं समस्तप्रवचनवंशः। स्त्रीप्राधान्यात्गुणवान्पुत्रो भवतीति प्रस्तुतमतः स्त्रीविशेषणेनैव पुत्रविशेषणादाचार्यपरंपरा कीर्त्य
२८५ अथ वंशः पौतिमाषीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रो गोतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः परा
शरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रादौपस्वस्तीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रः कौशि
कीपुत्रात्कौशिकीपुत्र आलंबीपुत्राच्च वैय्याघ्रपदीपुत्राच्च वैय्याघ्रपदीपुत्रः काणवीपुत्राच्च कापीपुत्राच्च कापीपुत्रः आत्रे
यीपुत्रादात्रेयीपुत्रो गोतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपु[redacted]त्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वात्सीपुत्राद्वात्सी
पुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्त्तभागीपुत्रादार्त्तभागीपुत्रः शौंगीपुत्राच्छौंगीपुत्रः
सांकृतीपुत्रात्सांकृतीपुत्र आलंबायनीपुत्रादालंबायनीपुत्र आलंबीपुत्रादालंबीपुत्रो जायंतीपुत्राज्जायंतीपुत्रो मांडूका
यनीपुत्रान्मांडूकायनीपुत्रो मांडूकीपुत्रान्मांडूकीपुत्रः शांडिलीपुत्राच्छांडिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपु
त्राद्भालुकीपुत्रः क्रौंचिकीपुत्राभ्यां क्रौंचिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः प्राचीनयोगी राम०
पुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आ २८५
सुरेरासुरिः॥ ११ ७ ॥ ७ ॥ ७ ॥ ७ ॥

ते ११ लिखितं मनशारामकास्स्य॥ पौंडेकीहडनीमे॥

वृ॰ही॰ सोष्यंतीमद्भिरभ्युक्षतिप्रसवकालेसुखप्रसवनार्थमनेनमंत्रेणयथावायुःपुष्करिणीःसमिंजयतिसर्वतःएवातेगर्भएजत्विति।अथजात
२८४ कर्मजातेऽग्निमुपसमाधायांकआधायपुत्रंकंसेपृषदाज्यंसंनीयसंयोज्यदधिघृतेपृषदाज्यस्योपघातंजुहोत्यस्मिन्सहस्रमित्याद्यावापस

सोष्यंतीमद्भिरभ्युक्षति।यथावायुःपुष्करिणीꣳसमिंजयतिसर्वतः।एवातेगर्भएजतुसहावैतुजरायुणा।इंद्रस्यायंव्रजःकृतःसा
र्गलःसपरिश्रयः।तमिंद्रनिर्जहिगर्भेणसावराꣳसहेति।जातेऽग्निमुपसमाधायांकआधायकꣳसेपृषदाज्यꣳसंनीयपृषदा
ज्यस्योपघातंजुहोत्यस्मिन्सहस्रंपुष्यासमेधमानःस्वेगृहे।अस्योपसंद्यांमाच्छैत्सीत्प्रजयाचपशुभिश्चस्वाहा।मयिप्राणाꣳस्त्वयि
मनसाजुहोमिस्वाहा।यत्कर्मणात्यरीरिचंयद्वान्यूनमिहाकरं।अग्निष्टत्स्विष्टकृद्विद्वान्त्स्विष्टꣳसुहुतंकरोतुनःस्वाहेति।अथा
स्यदक्षिणंकर्णमभिनिधायवाग्वागितित्रिः।अथदधिमधुघृतꣳसंनीयानंतर्हितेनजातरूपेणप्राशयतिभूस्त्वयिदधामिभुवस्त्वे
दधामिस्वस्त्वयिदधामिभूर्भुवःस्वःसर्वंत्वयिदधामीति॥ ९ ॥ ७ ॥ ७ ॥ ७ ॥

तत्रयास्यदक्षिणकर्णमभिनिधायस्वमुखंवाग्वागितित्रिर्जपेत्।अथदधिमधुघृतंसंनीयानंतर्हितेनाव्यवहितेनजातरूपेण राम॰
हिरण्येनप्राशयतिएतैर्मंत्रैःभूस्त्वयिदधामीत्याद्यैर्मंत्रैःप्रत्येकं॥ ५ ॥ ७ ॥ ७ ॥ २८४

२८४

अथाभिघातरेव काले ऽवघातनिर्दिष्टौ स्तडुंलानादाय स्थालीपाक[...]स्थालीपाकविधिना जपं वेष्टितान्तसंस्कारं कृत्वा चरुं श्रपयित्वा
स्थालीपाकस्याहुती जुहोति ऽयथातमुपहत्योपहन्म अग्नये स्वाहा इत्याद्याः सर्वो विधिर्द्रष्टव्योऽत्र हुत्वा इमं च रुशेषं प्राश्ना
अथाभिघातरेव स्थालीपाकाहुतीर्जपं वेष्टित्वा स्थालीपाकस्योपयात जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवा
य स्वाहेति हुत्वा हुत्वा प्राति प्राशे पतरस्याः प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्ष्य उत्तिष्ठातो विश्वावसो
न्यामिच्छ प्रपूर्व्यं सं जायां पत्या सहेति। अथैनामभिपद्यते अमोहमस्मि सा त्वं सा त्वमस्यमो अहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं
तावेहि संरभावहै सहरेतो दधावहै पुंसे पुत्राय वित्तय इति। अथास्या ऊरू विहापयति। विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठा
य मुखेन मुखं संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधा
तु ते। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ ते
तं गर्भं हवामहे दशमे मासि सूतये॥ यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी। वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति
ति स्वयं प्राश्येतरस्याः पत्न्यै प्रयच्छति स्थालीस्थं प्रक्षाल्य पाणी आचम्योदपात्रं पूरयित्वा तेनोदकेनैनां त्रिरभ्युक्ष्य अनेन मंत्रेण उत्तिष्ठात इति सकृन्मं
त्रोच्चारणमथैनामभिमंत्र्य कृत्वा रोदनादियाप सकामं भुक्ते इति क्रमो द्रष्टव्यः। संवेशनकाले मोहमस्मीत्यादिमंत्रेणाभिपद्यते ऽथास्या
ऊरू विहापयति विजिहीथां द्यावापृथिवी अनेन तस्यामर्थं निष्ठायादि पूर्ववत् त्रिरेनां शिरःप्रभृत्यनुलोमामनुमार्ष्टि विष्णुर्योनिमित्यादिमं

शृ टी॰
२७७

277

औडुंबरउडुंबरवृक्षमयेकंसेचमसेवाज्यस्यैवविशेषणांकंसाकारेचमसाकारेस्वाज्ञौडुंबरस्वाकारेउविकल्पोनौडुंबरत्वेसर्वौषधंसर्वासामोषधी
नांसमूहंयथासंभवंयथाशक्तिचसर्वौषधीःसमाहृत्यतत्रयाम्याणांउदशनियमेनग्राम्याःव्रीहियवाद्याःवन्यमारण्याःअधिकृत्यहरोठनदो
षोयाम्यारण्यांफलानिचयथासंभवयथाशक्तिचइतिशहःसमस्तसंभारोपचयप्रदर्शनार्थः अन्यदपिपत्संभरणीयतत्सर्वंसंभरेत्यर्थः॥को
मस्तत्रगृह्योक्तोदर्भःपरिसमूहनपरिलेपनेभूमिसंस्कारोऽग्निमुपसमाधायेतिवचनादेवसिद्धेऽग्नावितिगम्यते॥एकवचनाऽउपसमाधान

डुंबरेकंसेचमसेवासर्वौषधंफलानीतिसंभृत्यपरिसमुह्यपरिलिप्याग्निमुपसमाधायपरिस्तीर्याज्यंसंस्कृत्ययुं॰मान
हृत्वेणामथ॰सन्नीपजुहोतियावंतोदेवास्त्वयिजातवेदस्तिर्यंचोघ्नंतिपुरुषस्यकामान्तेभ्योहंभागधेयंजुहोमितेमातृप्ताः॰स
र्वैःकामैस्तर्पयंतुस्वाहायाग्निरश्चीनिपद्यसेहविर्धरणीइतित्वांघृतस्यधारयायजेसंराधनीमहं॰स्वाहा॥ २ ॥

अवरागाद्धियमानस्यैवोपसमाधानंपरिस्तीर्यदर्भानाहृतास्मात्तत्वात्कर्मणःस्थालीपाकाद्धृत्यपरिगृह्यतेनाज्यसंस्कृत्यसंसानहृत्वेण
पुनाग्नानहृत्वेणापुराणाहंसंयुक्तेनंमंथसर्वौषधफलपिष्टंतत्रौडुंबरेचमसेदधिमधुनिघृतेचोपसिच्येकपोपमंथमोपसंमथ्यस राम०
त्रीयमध्येसंस्थाप्यौडुंबरेणास्त्रुवेणावापस्थानत्राग्निमसजुहोमेजेमैचैयीवन्नोदेवाइत्याद्ये २ ॥ ३ ॥ ४ ॥ २७७

सयःकामयेतज्ञानकर्मणोर्गतिरुक्तातत्रज्ञानंस्वतंत्रंकर्मतुदैवमानुषवित्तद्वयापेक्षंतेनकर्मार्थंवित्तमुपार्जनीयंतच्चाप्रत्यवायकारिणो
पायेनेतितदर्थंमंथाख्यंकर्मारभ्यतेमहत्वप्राप्तयेमहत्वेचसतिश्रीसिद्धिर्हिवित्तंतदुच्यते।सयःकामयेतसयोवित्तार्थीकर्मण्यधिकृतोयःस
कामयेतकिंमहन्महत्वंप्राप्नुयांमहान्स्यामित्यर्थः।तत्रमंथकर्मणोविधिरितिनसर्वकालोऽभिधीयतेउदगयनेआदित्यस्यतत्रसर्व
त्रप्राप्तावापूर्यमाणपक्षस्यशुक्लपक्षस्यतत्रापिसर्वत्रप्राप्तौपुण्याहेनुकूलेआत्मनःकर्मसिद्धिकरइत्यर्थोद्वादशाहंयस्मिन्पुण्ये
नुकूलेकर्मचिकीर्षितंततःप्राक्पुण्याहमेवारभ्यद्वादशाहमुपसद्व्रतीउपसत्सुव्रतमुपसत्तद्व्रष्टिविशेषःउपसदःप्रसिद्धाज्योति

सयःकामयेतमहत्प्राप्नुयामित्युदगयनआपूर्यमाणपक्षस्यपुण्याहेद्वादशाहमुपसद्व्रतीभूत्वा॥ १ ॥ ७ ॥

ष्टोमेतत्रयस्तनोपदचायचयद्वारेणपयोभक्षणंतद्व्रतंअत्रचतत्कर्मानुपसंहारात्केवलमितिकर्तव्यताशून्यंपयोभक्षणमात्रमुपादी
यतेनतूपसदएवव्रतमितियदाविग्रहस्तदासर्वमितिकर्तव्यतारूपंग्राह्यंभवति।तत्कस्मान्नपरिगृह्यतइत्युच्यते।स्मार्तत्वात्कर्मणःस्मा
र्तंहीदंमंथकर्मनतुश्रुतिविहितंतत्कथंस्मार्तंभवितुमर्हतिस्मृत्यनुवादिनीहिश्रुतिरियंश्रौतत्वेहिप्रकृतिविकारभावस्ततस्वप्रकृत
धर्मग्राहितंविकारकर्मणोनत्विहश्रौतत्वमतएवावसथ्याग्नावेतत्कर्मविधीयतेसर्वाचार्यतस्मार्तंवेतिउपसद्व्रतीभूत्वापयोव्रतःसन्नित्यर्थः १

बृ॰टि॰ अथ पुनर्ये उत्तरं दक्षिणं चैतौ पंथानौ न विदुरुत्तरस्य दक्षिणस्य वा पथः प्रतिपत्तये ज्ञानं कर्म वा नानुतिष्ठंतीत्यर्थः। ते किं भवंतीत्युच्यते ते कीटाः पतं-
१७६ गाः यदिदं यच्चेदं दंदशूकं दंशमशकमित्येतद्भवंति। एवं हीयं संसारगतिः कष्टा। अस्यां निमग्नस्य पुनरुद्धार एव दुर्लभः। तथा च श्रुत्यंतरं तानीमा-
निक्षुद्राण्यसकृदावर्तीनि भूतानि भवंति जायस्व म्रियस्वेति। तस्मात्सर्वोत्साहेन यथाशक्ति स्वाभाविककर्मज्ञानहानेन दक्षिणोत्तरमार्ग-
प्रतिपत्तिसाधनं शास्त्रीयं कर्म ज्ञानं वानुतिष्ठेतेति वाक्यार्थः। ततो वै खलु दुर्निष्प्रपतरं तस्मादस्माज्जुगुप्सेतेति श्रुत्यंतरान्मोक्षाय प्रयते-
276 तेत्यर्थः। अत्रापि उत्तरमार्गप्रतिपत्तिसाधन एव महान्प्रयत्नः कर्तव्य इति गम्यते एवमेवानुक्षिप्य रिवंद्रते इत्युक्तत्वात्। स एव प्रश्नाः सर्वे निर्णी-

अथ य एतौ पंथानौ न विदुस्ते कीटाः पतंगा यदिदं दंदशूकं १७ द्वितीयं ब्राह्मणं॥ छ ॥

ताः असौ वै लोक इत्यारभ्य पुरुषः संभवतीति चतुर्थः प्रश्नः यथापि त्यथामाहुत्यामित्यादिः प्राथम्येन पंचमस्तु द्वितीयत्वेन देवयानस्य वा पथः प्रति-
पदं पितृयाणस्य चेति दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेन तेनैव च प्रथमो ग्रेरारभ्य केचिदर्चिः प्रतिपद्यंते केचिद्धूममिति विप्रतिपत्तिः राम॰
पुनरावृत्तिश्च द्वितीयः प्रश्न आकाशादिक्रमेणेमं लोकमागच्छंतीति तेनैवासौ लोको न संपूर्यते कीटपतंगादिप्रतिपत्तेश्च केषांचिदिति तृ- १७६
तीयोपि प्रश्नो निर्णीतः अथ माध्यापस्य द्वितीयं ब्राह्मणं॥ छ ॥ छ ॥ छ ॥

तेषां कर्मि संपातक्षयेस्मिन्काले तत्र यज्ञदानादिलक्षणं सोमलोकप्रापकं कर्म पर्यवसितं परिगच्छति यस्मिन्क्षीयत इत्यर्थः । अथ तदा इममेव प्रसिद्धमाका
शमभिनिष्पद्यंते यास्ताः श्रद्धाशब्दवाच्या आपः द्युलोकाग्नौ हुता आपः सोमाकारपरिणता याभिः सोमलोके कर्मणामुपभोगाय शरीरमारब्ध
मम्मयं ताः कर्मक्षये हि मायाद्धिमपिंड इवातपसंपर्कात्प्रविलीयंते प्रविलीनाः सूक्ष्मा आकाशभूता इव भवंतीति तदिदमुच्यते इममेवाकाशमभिनि
ष्पद्यंत इति ते पुनः कर्मिणस्तच्छरीराः संतः पुरोवातादिना इतश्चामुतश्च नीयंते तेंतरिक्षगाः तदा हाकाशाद्वायुमभिवायोर्वृष्टिं प्रतिपद्यंते
तदुक्तं पर्जन्याग्नौ सोमं राजानं जुह्वतीति ततो वृष्टिभूता इमां पृथिवीं पतंतीति ते पृथिवीं प्राप्य व्रीह्यादिपवाद्यन्नं भवंति तदुक्तमस्मिँल्लोके ग्नौ वृष्टिं

तेषां पदात्तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यंत आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्रा
प्यान्नं भवंति त एवमेवानुपरिवर्त्तंते ॥ १६ ॥

जुह्वतीति तस्या आहुत्या अन्नं संभवतीति ते पुनः पुरुषाग्नौ हूयंते अन्नभूता रेतसि सिचितं ते रेतोभूताः योषाग्नौ हूयंते ततो जायंते लोकं प्रत्युत्थायापि
तस्मिँल्लोके प्रत्यवतिष्ठंते अग्निहोत्रादिकर्माण्यनुतिष्ठंतीति ततो धूमादिना पुनः पुनः सोमलोकं पुनरिमं लोकमिति त एवं कर्मिणोऽनुपरिवर्तंते
ते घटीयंत्रवच्चक्रीभूता भ्रमंतीत्यर्थः । उत्तरमार्गाय तु योग्यं कर्मापेक्षया वन्न ब्रह्मविद्धरिति नु कामयमानाः संसरंतीत्यर्थः १६

अथ पुनर्ये नैवं विदुरुक्तार्थस्याग्निहोत्रसंबंधपदार्थषट्कस्यैव वेदितारः केवलकर्मिणो यज्ञेनाग्निहोत्रादिना दानेन बहिर्वेदि भिक्षमाणेभ्यो द्रव्यसंवि
भागलक्षणेन तपसा बहिर्वेदिश्रद्धादीक्षादिव्यतिरिक्तेन कृच्छ्रचान्द्रायणादिना लोकान् जयन्ति लोकानिति बहुवचनात्तत्रापि फलतारतम्यमभिप्रे
तं ते धूममभिसंभवन्त्युत्तरमार्गस्येवेहापि देवता एव धूमादिशब्दवाच्या धूमदेवतां प्रतिपद्यन्त इत्यर्थः। आतिवाहिकत्वं च देवतानामुक्तं देवं धूमा
द्रात्रिं रात्रिदेवतां ततोऽपक्षीयमाणपक्षमपक्षीयमाणपक्षदेवतां ततो यान् षण्मासान् दक्षिणामादित्य एति मासदेवताविशे
षान् प्रतिपद्यन्ते मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्रान्नभूतान् यथा सोमं राजानमिह यज्ञे ऋत्विजः आप्यायस्वाप

अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसंभवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाण
पक्षमपक्षीयमाणपक्षाद्यान् षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं
प्राप्यान्नं भवन्ति ताꣳस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्वापक्षीयस्वेत्येवमेनाꣳस्तत्र भक्षयन्ति १५

क्षीयस्वेति भक्षयन्त्येवमेनांश्चन्द्रं प्राप्तान्कर्मिणो भृत्यानिव स्वामिनो भक्षयन्त्युपभुञ्जते देवाः आप्यायस्वापक्षीयस्वेति न मन्त्रः किं तर्ह्याप्याय्याप्याय्य चम
सस्थं भक्षणेनापक्षयं च कृत्वा पुनः पुनर्भक्षयन्ति तथा। एवं देवा अपि सोमलोके लब्धशरीरान् कर्मिण उपकरणभूतान् पुनः पुनर्विश्रामय
न्तः कर्मानुरूपं फलं प्रयच्छन्तः। तद्धि तेषामाप्यायनं सोमस्याप्यायनमिवोपभुञ्जते उपकरणभूतान् देवाः॥ १५ ॥ ७ ॥

अह्न आपूर्यमाणपक्षमहर्देवतयातिवाहिता आपूर्यमाणपक्षदेवतां प्रतिपद्यन्ते आपूर्यमाणपक्षदेवताभिस्ते तदापूर्यमाणपक्षाद्यान्षण्मासानुदङ् उत्तरां दिशमादित्यः सवितैति तान्मासान्मासदेवताः प्रतिपद्यन्ते अपक्षयदेवतयातिवाहिताः ते मासेभ्य इति वक्तव्ये नात्र संवत्सरचारिणः षडुत्तरायणदेवताभ्यो मासेभ्यः षण्मासदेवताभिरतिवाहिताः देवलोकाभिमानिनीं देवतां प्रतिपद्यन्ते देवलोकादादित्यमादित्याद्वैद्युतं विद्युदभिमानिनीं देवतां प्रतिपद्यन्ते विद्युद्देवतां प्राप्तान्ब्रह्मलोकवासी पुरुषो ब्रह्मणा मनसा सृष्टो मानसः कश्चिदेत्यागत्य ब्रह्मलोकान्गमयति ब्रह्मलोकानित्यधरोत्तरभूमिभेदेन भिन्ना इति गम्यते बहुवचनप्रयोगादुपासनतारतम्योपपत्तेश्च ते तेन पुरुषेण गमिताः सन्तस्तेषु ब्रह्मलोकेषु पराः प्रकृष्टाः सन्तः स्वयं परावतः प्रकृष्टाः समाः संवत्सराननेका

ह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्याद्वैद्युतं तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः ॥ १४ ॥

न्वसंति ब्रह्मणोऽनेकान्कल्पान्वसंतीत्यर्थः तेषां ब्रह्मलोकं गतानां नास्ति पुनरावृत्तिरस्मिन्संसारे न पुनरागमनमिति इहेति शाखान्तरपाठादिहेत्याकृतिमात्रग्रहणमिति चेच्छ्वोभूते पौर्णमासीमितिवदिति न इहेति विशेषणानर्थक्याद्यदि हि नावर्तन्त एवेह ग्रहणमनर्थकमेव स्यात् श्वोभूते पौर्णमासीमित्यत्र पौर्णमास्याः श्वोभूतत्वमनुक्तं न ज्ञायत इति युक्तं विशेषयितुं न हि तत्र श्व आकृतिशब्दार्थो विद्यत इति श्वःशब्दो निरर्थकः सन् श्वोभूते यत्र तु विशेषणशब्दे प्रयुक्तेऽन्विष्यमाणे विशेषणफलं चेद्गम्यते तत्र युक्तो निरर्थकत्वेनोत्स्रष्टुं विशेषणस्य ग्राह्यत्वं न तु सत्यां विशेषणफलावगतौ तस्मादस्मात्कल्पादूर्ध्वमावृत्तिर्गम्यते ॥ १४ ॥

बृ·टी· तस्माद्येगृहस्थाएवमग्निजोहमग्न्यपत्यमित्येवंक्रमेणाग्निभ्योजातोग्निरूपइत्येवंयेविदुस्तेचयेचामीअरण्येवानप्रस्थाःपरि
२२५ व्राजकाश्चारण्यनित्याःश्रद्धांश्रद्धायुक्ताःसंतःसत्यंब्रह्महिरण्यगर्भात्मानमुपासतेनपुनःश्रद्धांचोपासतेतेसर्वेर्चिरभिसं
भवंति।यावन्नगृहस्थाःपंचाग्निविद्यांसत्यंवानब्रह्मचेत्थंविदुस्तावत्श्रद्धाद्याहुतिक्रमेणपंचम्यामाहुतौहुतायांततोयोषा
275 ग्नेर्जाताःपुनर्लोकंप्रत्युत्थायिनोग्निहोत्रादिकर्मानुष्ठातारोभवंति।तेचकर्मणाधूमादिक्रमेणपुनःपितृलोकंपुनःपर्जन्या
दिक्रमेणेममावर्त्तंतेततःपुनर्योषाग्नेर्जाताःपुनःकर्मकृत्वैवमेवघटीयंत्रवत्गत्यागतिभ्यांपुनरावर्त्तंतेयदात्वेवंविदुस्त

येचामीअरण्येश्रद्धांसत्यमुपासतेतेर्चिरभिसंभवंत्यर्चिषोहर॥ १२ ॥

तोघटीयंत्रभ्रमणाद्विनिर्मुक्ताःसंतोर्चिरभिसंभवंति।अर्चिरितिनाग्निज्वालामात्रंकिंतर्हिअर्चिरभिमानिन्यर्चिःशब्दवाच्या
देवताउत्तरमार्गलक्षणाव्यवस्थितैवतामभिसंभवंति।नहिपरिव्राजकानामर्चिषैवसाक्षात्संबंधोस्तितेनदेवतैवपरिगृह्य
तेर्चिःशब्दवाच्याततोहर्देवतांमरणकालनियमानुपपत्तेरहःशब्दोपिदेवतैवायुषःक्षयोहिमरणंनह्येवंविदोहन्येवमर्त्तव्य
मित्यहर्मरणकालोनियंतुंशक्यतेनचरात्रौप्रेताःसंतोहःप्रतीक्षंतेसयावत्क्षिप्येन्मनस्तावदादित्यंगच्छतीतिश्रुत्यंतरात्॥ १३ ॥

नन्वग्निहोत्राद्यनिदर्शननिविषयमेवैतद्दर्शनं तच्च त्वक्रमसुक्तंतादिपदार्थषट्कनिर्णये दिव्यमेवाहवनीयं कुर्वीत इत्यादिरिहाप्युपथ
त्नेन कस्याग्नित्वमाहितस्य समित्वमित्यादिवाक्यसामर्थ्यं तस्मान्नच्छेषमेवैतद्दर्शनमिति नपरिग्रहात्पतति व्याभिससप्तप्रसप्त
यावदेवपरिग्रहस्तावदेवैवंशाद्धेन परामृष्टं पुक्रममथाप्यग्नानर्थक्यात्त्रिंशत्तत्वाञ्च संख्यायात्र प्रपएवं वक्तव्याः । अथानिर्दि
तमप्यनूद्येत पश्चात्प्रसंसंवानुवदन्नेयुक्तेनत्वसौ लोकोग्निरित्यथोपलक्षणार्थस्तत्याप्याद्येनाप्येन चोपलक्षणायुक्तेस्त्रुसंत
राज्ञ समाने हि प्रकरणेक्तं होतृप्रक्तौ यंचाग्नीन्वेदेति पंचसंख्यायाएवोपादानादनग्निहोत्रशेषमेतत्संवाप्यग्निदर्शनं यन्नग्नि
समिदादि सामान्यं तदग्निहोत्रस्त्वसमर्थमित्यवोचाम तस्मात्त्रोक्तंतादिपदार्थषट्कपरिज्ञानादर्चिरादि प्रतिपत्तिरेवमितिप्रक्र
तोपादानेनार्चिरादि प्रतिपत्तिविधानात्केपुनस्तेयएवंविद गृहस्था एव । ननु नेष्टोषवत्यादिसाधनेन धूमादि प्रतिपत्तिर्विधीयते
तानानेवंविदामपि गृहस्थानां यत्तादिसाधनोपपत्तेः भिक्षुवानप्रस्थयोश्चारण्यसंबंधेन ग्रहणान्न । गृहस्थकर्मसंबद्धत्वा
त्रयंवाग्निदर्शनस्यातो नापि ब्रह्मचारिणाएवंविद इति गृहस्थेनैतेषां तन्नेरेय यथि प्रवेशः स्मृति प्रामाण्यात् । अष्टाशीतिसहस्रा
णां क्षीणामूर्ध्वरेतसां । उत्तरेणार्यम्णः पंथाः तेमृतत्वं हि भेजिर इति ॥ १२ ॥ ७ ॥ ७ ॥

बृ॰टी॰ अथ यदा एनं मृतमग्नये अग्न्यर्थमेव यस्माद्धरन्ति ऋत्विजस्तस्याहुतिभूतस्य प्रसिद्धोऽग्निरेव होमाधिकरणं न परिकल्प्योऽग्निः प्रसिद्ध एव समित्समि
२७३ त्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गाराः विस्फुलिङ्गा विस्फुलिङ्गा यथाप्रसिद्धमेव सर्वमित्यर्थः। तस्मिन्पुरुषमन्त्याहुतिं जुह्वति तस्या आ

2 73

अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विस्फुलिङ्गा विस्फुलि
ङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ये य एवमेतद्विदुः १२

हुत्या आहुतेः पुरुषो भास्वरवर्णोऽतिशयदीप्तिमान्निषेकादिभिरेन्त्याहुत्यन्तैः कर्मभिः संस्कृतत्वात्संभवति निष्पद्यते। इदानीं प्रथमप्रश्ननिरा राम॰
करणार्थमाह ते के य एवं यथोक्तं पंचाग्निदर्शनमेतत्तद्विदुरेवंशब्दादग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गाश्रद्धादिविशिष्टाः पंचाग्न २७३
योनिर्दिष्टास्तानेवमेतान्पंचाग्नीन्विदुरित्यर्थः॥ १२ ॥

योषा वाव अग्निर्गौतमेत्यत्र योषेति स्त्री पंचमो होमाधिकरणमग्निस्तस्या उपस्थ एव समित्तेन हि सा समिध्यते। लोमानि धूमस्तदुत्थान
साम्यात् योनिरर्चिर्वर्णसामान्यात् यदन्तः करोति तेऽङ्गाराः अन्तःकरणं मैथुनव्यापारस्तेऽङ्गाराः वीर्योपशमहेतुत्वसामा
न्यात् वीर्योपशमकारणं मैथुने तथैवाङ्गारभावोऽग्नेरुपशमकारणमभिनन्दाः सुखलवाः क्षुद्रत्वसामान्याद्विस्फुलिं
गास्तस्मिन्नरेतो जुह्वति तस्या आहुतेः पुरुषः संभवति एवं श्रपर्जन्यार्थलोकपुरुषयोषाग्निषु क्रमेणाहूयमानाः सोमवृ

योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गास्त
स्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेः पुरुषः संभवति स जीवति यावज्जीवत्यथ यदा म्रियते॥ ११ ॥

ष्ट्यन्नरेतोभावेन स्थूलतारतम्यक्रममापद्यमानाः श्रद्धाशब्दवाच्या आपः पुरुषशरीरमारभन्ते यः प्रश्नश्च तद्धि वेत्थ यतिथ्यामाहु
त्यां हुतायामापः पुरुषवाचो भवन्तीति ३ इति स एष निर्णीतः पंचम्यामाहुतौ योषाग्नौ हुतायां रेतोभूता आपः पु
रुषवाचो भवन्तीति स पुरुष एवं क्रमेण जातो जीवति कियन्तं कालमित्युच्यते। यावज्जीवति यावदस्मिन् शरीरे स्थितिनिमित्तं क
र्म ध्रियते तावदित्यर्थः। अथ तत्क्षये यदा यस्मिन्काले म्रियते॥ ११ ॥ छ ॥

बृ॰टी॰ पुरुषो वा अग्निर्गौतम प्रसिद्धः शिरःपाण्यादिमान् पुरुषस्तस्य व्यात्तं विवृतं मुखं समित् विवृतेन हि मुखेन दीप्यते पुरु
२७२ षो वचनस्वाध्यायादौ यथा समिधाग्निः प्राणो धूमस्तदुत्थानसामान्यान्मुखाद्धि प्राण उत्तिष्ठति वाक् शब्दोऽर्चिर्व्यंजकत्वसामा

272

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरंगाराः
श्रोत्रं विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्न
ं जुह्वति तस्या आहुत्यै रेतः संभवति ॥ १०॥

न्यादर्चिर्व्यंजकं तथा वाक् शब्दोऽभिधेयव्यंजकः चक्षुरंगारा उपशमसामान्यात् प्रकाशाश्रयत्वाद्वा श्रोत्रं विस्फुलिंगा वि
क्षेपसामान्यात्तस्मिन्नन्नं जुह्वति ननु नैव देवा अन्नमिह जुह्वतो दृश्यन्ते नैष दोषः प्राणा नो हि देवास्तेऽपि यन्नेऽरक्षि दैवमंडलस्थो देवास्तद्व रम॰
नाश्नं प्राणाः स्तेऽवात्र स पुरुषेऽग्नौ प्रास्यन्त्याहुतेरेतः संभवत्यन्नपरिणामो हि रेतः ॥ १०॥ २७२

पर्जन्यो वा अग्निर्गौतमेति द्वितीयाहुत्याधारः आहुत्योराहुतिक्रमेण पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवतात्मा तस्य संवत्सर एव समिदेवं तत
रेणाद्धि शरद्ग्रीष्मादिभिर्वा पार्थिवैः स्वायत्तैः पर्जन्यो वै विपरिवर्त्तमानेन पर्जन्योग्निर्दीप्यते। अभ्राणि धूमो धूमप्रभवत्वाद्धूमवदुपलक्ष्यत्वाद्वा विद्युदर्चिः
प्रकाशसामान्यादशनिरंगाराः उपशांतत्वात्काठिन्यसामान्याद्वा ह्रादनयो ह्रादनशब्दाः स्तनयित्नुशब्दा विस्फुलिंगाः विक्षेपानेकत्वसा
मान्यात्तस्मिन्नेतस्मिन्नित्याहुत्यधिकरणाविर्भावार्थं देवा इति त एव होतारः सोमं राजानं जुह्वति यो द्युलोकाग्नौ श्रद्धाहुतं हुतायाम
भिनिर्वृत्तः सोऽद्वितीये पर्जन्याग्नौ हूयते तस्या आहुतेः सोमाहुतेर्वृष्टिः संभवति॥ अयं वै लोको ग्निर्गौतम अयं लोक इति प्राणिजन्मोपभोगा

पर्जन्यो वा अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरंगाराह्रादनयो विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ दे
वाः सोमं राजानं जुह्वति तस्या आहुतेर्वृष्टिः संभवति॥ अयं वै लोको ग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चंद्र
मा अंगारा नक्षत्राणि विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुतेरन्नं संभवति॥ ६ ॥

श्रयः क्रियाकारकफलविशिष्टः स तृतीयोग्निस्तस्याग्नेः पृथिव्येव समित्पृथिव्या ह्ययं लोकोऽनेकप्राण्युपभोगसंपन्नया समिध्यते अग्निर्धूमः पृथि
व्याश्रयोत्थानसामान्यात्पार्थिवं हीन्धनद्रव्यमाश्रित्याग्निरुत्तिष्ठति यथा समिदाश्रयेण धूमो रात्रिरर्चिः समित्संबंधप्रभवसामान्यादग्नेः स
मित्संबंधेन ह्यर्चिः संभवति तथा पृथिवीसमित्संबंधेन शर्वरी पृथिवीच्छायां हि शार्वरं तम आचक्षते। चंद्रमा अंगारास्तत्प्रभवत्वसामान्यात्
र्चिषो ह्यंगाराः प्रभवंति। तथा रात्रौ चंद्रमा उपशांतत्वसामान्याद्वा नक्षत्राणि विस्फुलिंगा विस्फुलिंगवत्त्विक्षेपसामान्यात्तस्मिन्नेतस्मिन्नित्यादि

बृ.टी. तत्र वागेव प्रथमं ह अस्माच्छरीराडुच्चक्राम । साऽक्रान्तवती सा चोत्क्रम्य संवत्सरं प्रोष्य प्रोषिता भूत्वा पुनरागत्योवाच कथमशकत न शक्तवन्तो यूयं मद्
२६३ तेऽमां विना जीवितुमिति एवमुक्ता ऊचुर्यथा लोके कला मूका अवदन्तो वाचा प्राणन्तः प्राणेन व्यापारं कुर्वन्तः प्राणेन पश्यन्तो दर्शनव्यापारं च चक्षुषा

वा श्रोत्रमुच्चक्राम सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्य
न्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् । चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वां
सो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः । श्रोत्रं होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृ
ते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वांसो मनसा प्रजायमाना
रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रं । श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः । रेतो होच्चक्राम तत्संवत्सरं प्रोष्या
गत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृ रम्भ०
ण्वन्तः श्रोत्रेण विद्वांसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ ५ ॥ ६ ॥ ७ ॥ २६३

कुर्वन्तस्तथा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा कार्याकार्यादिविषयं प्रजायमाना रेतसा पुत्रान् उत्पादयन्तः एवमजीविष्म वयमिमे वयं प्राणोद्देश्ये
न राजा गात्मनोऽस्मिन्नवसिष्ठन्तं तु प्राविवेश ह वाक् यथा चक्षुर्होच्चक्रामेत्यादि पूर्ववत् श्रोत्रं मनः प्रजातिः ॥ ५ ॥

तेहइमेप्राणावागादयः अहंश्रेयसेअहंश्रेयानित्येतस्मैप्रयोजनायविवदमानाविरुद्धंवदमानाब्रह्मजग्मुर्ब्रह्मगतवंतोब्रह्मशब्दवा
च्यंप्रजापतिंगत्वाचतद्ब्रह्मऊचुरुक्तवंतः कोनोस्माकंमध्येवसिष्ठः कोनोस्माकंवसतिचवासयतिचातद्ब्रह्मतैःपृष्टंसत्हउवाचउक्तवद्य
स्मिन्वोयुष्माकंमध्येउत्क्रांतेनिर्गतेशरीरेइदंशरीरंपूर्वस्मादतिशयेनपापीयःपापतरंमन्यतेलोकःशरीरंहिनामानेकाशुचिसंघाततत्तज्जीव

तेहेमेप्राणाअहंश्रेयसेविवदमानाब्रह्मजग्मुस्तद्धोचुःकोनोवसिष्ठइतितद्धोवाचयस्मिन्वउत्क्रांतइदं
शरीरंपापीयोमन्यतेसवोवसिष्ठइति॥५ ॥ १ ॥

तोऽपिपापमेवततोऽपिकष्टतरंयस्मिन्नुत्क्रांतेभवतिवैराग्यार्थमिदमुच्यतेपापीयइतिसवोयुष्माकंमध्येवसिष्ठोभविष्यतीतिजानन्न
पिवसिष्ठंप्रजापतिर्नोवाचायंवसिष्ठइतिइतरेषामप्रियपरिहारायतएवमुक्ताब्रह्मणाआत्मनोवीर्यपरीक्षणायक्रमेणोत्क्र
क्रमुः॥ ५ ॥ १ ॥

छां० साहवाक्प्रथमंबलिंदानायप्रवृत्ताहकिलऽवाचाऽकवतीयदेऽहंवसिष्ठास्मियन्ममवसिष्ठत्वंतत्तवैवतेनवसिष्ठगुणोनत्वंतत्त्वसि
२६४ ष्ठोसीतियदहंप्रतिष्ठास्मित्वंतत्प्रतिष्ठोसियाममप्रतिष्ठासात्वमसीति चक्षुः समानमन्यत्तेहंपदायतनंश्रो जाति त्वगुणांक्रमेण

264 साहवागुवाच यद्वाअहंवसिष्ठास्मित्वंतद्वसिष्ठोसीतियद्वाअहंप्रतिष्ठास्मित्वंतत्प्रतिष्ठोसीतिचक्षुर्यद्वाअ
हं‌ऽसंपदस्मित्वंतत्संपदसीतिश्रोत्रंयद्वाअहमायतनमस्मित्वंतदायतनमसीतिमनोयद्वाअहंप्रजातिरस्मि
त्वंतत्प्रजातिरसीतिरेतस्तस्योमेकिमन्नंकिंवासइतियदिदंकिंचाश्वभ्यआकृमिभ्यआकीटपतंगेभ्यस्तत्तेन्नं॥७॥

समर्पितवन्तःप्राणायैवंसाधुबलिंदत्त्वावंतोऽब्रुवंस्तस्योमेएवंगुणविशिष्टस्यकिमन्नंकिंवासइतिआहुरितरेयदिदंलोकेकिंचकिंचि एम०
दन्नंनामआश्वभ्यआकृमिभ्यआकीटपतंगेभ्यःपतच्चश्वान्नंकृम्यन्नंकीटपतंगान्नंचतेनसहसर्वमेवयत्किंचित्प्राणिभिरद्यमानम २६४
न्नंतत्सर्वंतवान्नंसर्वंप्राणस्यान्नमितिदृष्टिरत्रविधीयते॥७

अथ ह प्राण उत्क्रमिष्यन्क्रमशः कारिष्यंस्तदानीमेव स्वस्थानात्प्रचलिता वागादयः किमिवेत्याह यथा लोके महाश्वासौ सुहय
स्त्वमेहाश्वः सुहयः शोभनो हयीलक्षणोपेतो महान्परिमाणतः सिन्धुदेशभवः। सैंधवोभिजननतः पड्वीशशंकून्पादबंधनशंकून्
ह्वोशाश्चते शंकवश्च तान्संवृहेदुद्यच्छेत् एकप्रयत्नेनैवोत्खनेत् आरोह आरूढे परीक्षणाय एवं ह एव इमान्वागादीन्प्राणान्संववर्ह
यतवचनात्स्वस्थानाद्भ्रंशितवान् सो वागादयः हत्रत्नु हे भगवो भगवन्मोत्क्रमीः यस्मान्न वै शक्ष्यामः त्वदृते त्वां विना जीवितुं यथैव मम

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैंधवः पड्वीशशंकून्संवृहेदेवं हैवेमान्प्राणान्संववर्ह ते होचुर्भगवन्नुत्क्रमीर्न वै श
क्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ ६ ॥ ७ ॥

श्रेष्ठता विज्ञाता भवद्भिरहमत्र श्रेष्ठस्तस्मान्मे मम बलिं करं कुरुत न करं प्रयच्छन्नेति अयं च प्राणसंवादः कल्पितो विदुषः श्रेष्ठपरीक्षणाय का
रोपदेशोऽनेन द्विप्रकारेण विद्वान् को नु खल्व

मानेनैव विराड्जं वैराजाभिधानमात्मत्वचेतनीकरणमात्रेणापि वैराजेतिसंज्ञामाधत्त इत्यर्थः नन्वनामरूपस्याकीदृशंतन्ना
मरूपमित्याशंक्याह सहस्रशीर्षे शीर्षोपलक्षितसर्वाक्षःकरणादिकमपि ज्ञेयम् वै पुनः स हि वैराजः पुरुषः महावि
शं॰ऐ॰ ष्णुः महाविष्णुनामनामृदित्यर्थः उक्तं च ब्रह्मसंहितायाम् शक्तिमान पुरुषः सोयं लिंगरूपी महेश्वरः तस्मिन्नावि
३३७ रभूल्लिंगे महाविष्णुर्जगत्पतिः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सहस्रबाहुर्विश्वात्मा सहस्रांशुः सहस्रसू

नाम्यांप्रजास्ताभिरंडोऽभ्यस्यैवराजमायांशुसहस्रशीर्षकम्
स एव महाविष्णुर्नेतन्रूपे स सृष्ट्यापकल्पांबुनिधौ महत्स्वम् ७०

267

मिति ननु सुमहाविष्णुः कस्माद्विष्णोरेव परमकारणत्वेन महत्त्वमस्तु सत्यं अत्रमहत्सु विद्यातीति महाविष्णुमहत्त्वम शम
त्रस्याभिव्यक्तमहानृतप्रवेशनान्महत्त्वं परमकारणत्वेन विष्णोरेव ननु तदानीं तस्मिन्महत्त्वं कुतो नोच्यत इति चेत्सत्यं मुख्या ४७
नव तदानीं कारणरूपत्वेन महत्त्वस्यानेराग्रहः अन्येषामभावात् न चान्यस्याभावात् प्रवेशाभावात् अतः विष्णुला म ३
नावास्तु प्रवेशनारेव तदर्थेनमिति वाच्यं स्वस्मिन्नेव प्रवेशनात् न च स्वस्मिन्नाकाशाभावात्कथं प्रवेश इति वाच्यम् स्वस्य

समर्थ

भेरुख्यादिभिः परमाउत्कृष्टाश्रोशिभूतत्वात् अतः सर्वं विष्णुमयं जगदिति उक्तं चैतच्छ्रीमदाचार्येण हरिरेव जगज्जगदेव
हरिर्हरितो जगतो नहि भिन्नतनुः इति यस्य मतिः परमार्थगतिः स नरो भवसागरमुत्तरतीति अत्र कार्यकारणयोरभेद
दिति प्रदर्शितं उक्तं च श्रीभगवतगीतायां अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते इति मत्वा भजंते मां बुधा भावसमन्विताः
यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च गोपायति स्म कृष्णः तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमनुव्रजेदिति श्रु
त्यापि परमकारणत्वं भगवत एव स्मर्यते ननु वस्तु परमकारणत्वं भगवतः तथापि कुलालवद्भगवतोपि वैषम्यकता स्यादिति सा
शंकां परिहरति [illegible]मूलं अस्य प्रत्यहमनुभूतस्य प्रपंचस्य निमित्तमात्रं ननु कार्यकृतविक्षेपादिमत् इत्याह पूर्वं स्वे
व जगच्छ्रवणात् [illegible] एवांशावशात्कीसंभूते लिंगज्ञोन्यात्मके तत्र हरेः कामात्मकवीजेन प्रजाः संभूताः उक्तं चैतद्ब्रह्म
संहितायां लिंगयोन्यात्मिका जाता प्रजा माहेश्वरीः इमा इति क्रमेण प्राप्तस्य विराजः उत्पत्तिमाह ताभ्यामित्यादिः
श्रीकृष्ण परमात्मा ताभ्यां लिंगयोनिभ्यां शिवशक्तिभ्यां स्वागाभ्यां प्रजा असृजदिति शैवः माहेश्वरी प्रजाः संभूताः
त्यर्थः पु[illegible]जस्ताभिरंडमसृजदित्ति ताभिर्महत्तत्वाहंकारतन्मात्राभूतभूमिरंड चतुर्दशभुवनात्मकं सप्तावरणोपेतं वि
राडाख्यं स्वयं पुनरनंतः तत्सृष्ट्वा तदेवानुप्रविशदिति अंडमेत्यांडमभिव्याप्य तत्रायः पिंडवच्चेतनीकृत्य तदभि

पा२

छा॰ योहवैसंपदंवेदसंपद्धुणायुक्तंयोवेदतस्यैतत्फलमस्मैविडषेसंपद्यतेहकिंयंकामंकामयतेसकामःकिंपुनःसंपद्गुणार्कंश्रोत्रंवैसंपत्कथंपु
२६२ नःश्रोत्रस्यसंपद्गुणात्वमित्युच्यतेश्रोत्रेसतिहियस्मात्सर्ववेदाःअभिसंपन्नाःश्रोत्रेंद्रियवतोध्येयत्वाद्वेदविहितकर्मायत्ताश्चकामास्तस्मा
च्छ्रोत्रंसंपदतोविज्ञानानुरूपंफलंसंहास्मैपद्यतेयंकामंकामयतेयएवंवेदयोहवाआयतनंवेदायतनमाश्रयस्तद्योवेदायतने
स्वानांभवत्यायतनंजनानामन्येषामपिकिंपुनस्तदायतनमित्युच्यतेमनोवाआयतनमाश्रयइंद्रियाणांविषयाणांचमनआ

योहवैसंपदंवेदसंहास्मैपद्यतेयंकामंकामयतेश्रोत्रंवैसंपच्छ्रोत्रेहीमेसर्ववेदाअभिसंपन्नाःसंहास्मैपद्यतेयंकामंकामयतेयएवं
वेदयोहवाआयतनंवेदायतनंस्वानांभवत्यायतनंजनानांमनोवाआयतनंस्वानांभवत्यायतनंजनानांयएवंवेदयोहवै
प्रजातिंवेदप्रजायतेहप्रजयापशुभिरेतोवैप्रजातिःप्रजायतेहप्रजयापशुभिर्यएवंवेद ३ ॥ ७ ॥ ७ ॥

श्रिताहिविषयाआत्मनोभोग्यत्वंप्रतिपद्यंतेमनःसंकल्पवशानिचेंद्रियाणिप्रवर्तंतेनिवर्तंतेचातोमनआयतनमिंद्रियाणामतोदर्शना
नुरूप्येणफलमायतनंस्वानांभवत्यायतनंजनानांयएवंवेदयोहवैप्रजापतिंवेदप्रजायतेहप्रजयापशुभिश्चसंपन्नोभवतिरेतोवैप्र राम॰
जातिःरेतसाप्रजननेंद्रियमुपलक्ष्यतेतद्विज्ञानानुरूपंफलंप्रजायतेहप्रजयापशुभिर्यएवंवेद ३ ॥ ७ ॥ ९ ॥ २६२

योहवैवसिष्ठंवेदवसिष्ठःस्वानांभवतितत्दर्शनानुरूप्येणफलंयेषांचज्ञातिव्यतिरेकेसार्वाशिष्टोभवितुमिच्छन्तितेषांचवसिष्ठोभवतीत्युच्य
तेऽन्तर्हिकासौवसिष्ठेतिवाग्वैवसिष्ठावासयत्यतिशयेनचेस्तेचेतिवसिष्ठावाग्मिनोहिधनवन्तोवसन्त्यतिशयेनाच्छादनार्थस्यवावसेर्व
सिष्ठाभिभवन्तिहिवाचावाग्मिनोऽन्यांस्तेनवसिष्ठगुणावत्परिज्ञानाद्वसिष्ठगुणोभवतीतिदर्शनानुरूपंफलंयोहवैप्रतिष्ठांवेदप्रतिति
ष्ठत्यनयेतिप्रतिष्ठातांप्रतिष्ठांप्रतिष्ठागुणावन्नंयोवेदतस्यैतत्फलंप्रतितिष्ठतिसमेदेशेकालेचतथाऽदुर्गेविषमेचदुर्गमनेचदे

योहवैवसिष्ठंवेदवसिष्ठःस्वानांभवतिवाग्वाववसिष्ठावसिष्ठःस्वानांभवत्यपिचयेषांबुभूषतियएवंवेद॥
योहवैप्रतिष्ठांवेदप्रतितिष्ठतिसमेप्रतितिष्ठतिदुर्गेचक्षुर्वैप्रतिष्ठाचक्षुषाहिसमेचदुर्गेचप्रतितिष्ठ
तिप्रतितिष्ठतिसमेप्रतितिष्ठतिदुर्गेयएवंवेद॥ २॥

शेदुर्भिक्षादौवाकालेविषमेयद्येवमुच्यतेकासौप्रतिष्ठाचक्षुर्वैप्रतिष्ठांकथंचक्षुषःप्रतिष्ठात्वमित्याहचक्षुषाहिसमेचदुर्गेचदृष्ट्वा
प्रतितिष्ठत्यतोऽनुरूपंफलंप्रतितिष्ठतिसमेप्रतितिष्ठतिदुर्गेयएवंवेदेति॥ २॥ ३॥ ३॥

छां॰टी॰ २६१ प्राणो गायत्रीत्युक्तं कस्मात्पुनः कारणात्प्राणभावो गायत्र्याः न पुनर्वागादिभाव इति यस्मात् ज्येष्ठश्च श्रेष्ठश्च प्राणो न वागादयो ज्येष्ठश्रेष्ठगुण
भाजः कथं ज्येष्ठत्वं श्रेष्ठत्वं च प्राणस्येति तन्निर्दिधारयिषयेदमारभ्यते अथवा उक्थयजुःसामक्षत्त्रादिभावैः प्राणस्यैवोपासनमभिहितं सत्स्व
प्यन्येषु चक्षुरादिषु तत्र हेतुमात्रमिहानन्तर्येणाभिसंबध्यते । न पुनः पूर्वशेषता विवक्षिता तत्र खिलत्वादस्य कोऽस्य पूर्वत्र यदनुक्तं विशिष्टफलं
प्राणविषयमुपासनं तद्वक्तव्यमिति यः कश्चिद्वेदेत्यस्यावधारणार्थः । यो ज्येष्ठश्रेष्ठगुणं वक्ष्यमाणं यो वेद सोऽभवत्येव ज्येष्ठश्च श्रेष्ठश्च एवं
फलेन प्रलोभितः सन्नृषिश्रायाभिमुखीभूतः तस्मै चाह । प्राणो वै ज्येष्ठश्च श्रेष्ठश्च कथं पुनरवगम्यते । प्राणो ज्येष्ठश्च श्रेष्ठश्चेति यस्मान्निषेक
काल एव शुक्रशोणितसंबन्धः प्राणादिकलापस्याविशिष्टस्तथापि ना प्राणं शुक्रं विरोहतीति प्रथमो वृत्तिलाभः प्राणस्य चक्षुरादिभ्योतो

हरिः ॐ ॥ यो ह वै ज्येष्ठं श्रेष्ठं च वेद ज्येष्ठश्च ह श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य
ज्येष्ठो वयसा प्राणो निषेककालादारभ्य गर्भं पुष्यति प्राणः प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीनां वृत्तिलाभ इत्यतो युक्तं प्राणस्य ज्येष्ठत्वं ॥ एवं वेद १॥
चक्षुरादिषु भवति तु कश्चित्कुले ज्येष्ठो गुणहीनत्वात्तु न श्रेष्ठो मध्यमः कनिष्ठो वा गुणाढ्यत्वाद्भवेच्छ्रेष्ठो न ज्येष्ठो न तु तथेहेत्याह प्राण एव
तु ज्येष्ठश्च श्रेष्ठश्च कथं पुनः श्रैष्ठ्यमवगम्यते प्राणस्य तदिह संवादेन दर्शयिष्यामः सर्वथापि तु प्राणं ज्येष्ठश्रेष्ठगुणं यो वेदोपास्ते स स्वानां राम॰
ज्ञातीनां ज्येष्ठश्च श्रेष्ठश्च भवति श्रेष्ठज्येष्ठगुणोपासनसामर्थ्यात् स्वव्यतिरेकेणापि च येषां मध्ये ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूषति भवितु २६१
मिच्छति तेषामपि ज्येष्ठश्रेष्ठप्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति । ननु वयोनिमित्तं ज्येष्ठत्वं तदिच्छातः कथं भवतीत्युच्यते । नैष दोषः प्राणवद्वृत्तिलाभव
त्त्वस्यैव ज्येष्ठत्वस्य विवक्षितत्वात् ॥ १ ॥

मामामृतस्य सत्यस्य शरीरपाते शरीरस्थो यः प्राणो वायुः सोऽनिलं वायुमेव प्रतिगच्छतु तथान्या देवाः स्वां स्वां प्रकृतिं गच्छन्त्वथेदमपि भस्मान्तं सत् पृथिवीं यातु शरीरमथेदानीमात्मनः संकल्पभूतां मनसि व्यवस्थितामग्निदेवतां प्रार्थयति। ॐमिति क्रतो इति च संबोधनार्थौ वा। ॐकारप्रतीकत्वादोंमनोमयत्वाच्च क्रतुः हे ॐकार हे क्रतो स्मर स्मर्त्तव्यं यन्मया तत्कालो हि त्वत्स्मरणवशाद्धीष्टा गतिः प्राप्यतेऽतः प्रार्थ्यते यन्मया प्राक्कृतं तत्स्मर च पुनरुक्तिरादरार्था। किं चे हे अग्ने नय प्रापय सुपथा शोभनेन मार्गेण रायेऽधनाय कर्मफलप्राप्तय

वायुरनिलममृतमथेदं भस्मान्तं शरीरं ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर। अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम १६ पंचदशं ब्राह्मणं इति श्री उपनिषत्कांडे पंचमोऽध्यायः॥

इत्यर्थः। न दक्षिणेन कृष्णेन पुनरावृत्तियुक्तेन किं तर्हि शुक्लेनैव सुपथास्मान्विश्वानि सर्वाणि हि देव वयुनानि प्रज्ञानानि सर्वप्राणिनां विद्वान् किं च युयोधि अपनय वियोजयास्मदस्मत्तो जुहुराणं कुटिलं एनः पापं पापजातं सर्वं तेन वयं वियुक्ता वयमेष्याम उत्तरेण पथा त्वत्प्रसादात् किं तु वयं तव परिचर्यां कर्तुं न शक्नुमो भूयिष्ठां बहुतमां ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थोऽन्यत्कर्तुमशक्ताः सन्तः इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यभाष्ये सप्तमोध्यायः समाप्तः १६ ॥

ईशटी॰ योज्ञानकर्मसमुच्चयकारी सोंतकाले आदित्यं प्रार्थयत्यखिलचक्षुःसंयोगाय आलम्बरीयः यादो हि सः तद्व्यस्थानेषु ज्ञानतमः स एवं प्रार्थयते हिरण्म
२६० येन ज्योतिर्मयेन पात्रेणापि धीयाते अपिहितं आच्छाद्यते एवमिदं सत्यमार्षं ब्रह्म ज्योतिर्मयेन मंडलेनापिहितमिवास्माकं हितं चेतसा मम दृश्यत्वात्तद्ड
च्यते सत्यस्यापिहितं मुखं स्वरूपं तदपिधानं पात्रमपिधानमिव दृश्यते न प्रतिबंधकारणं तत्त्वं हे पूषन् जगतः पोषणात् पूषा सविता अपावृणु दर्शन
प्रतिबंधकारणमपनयेत्यर्थः । सत्यधर्माय मे त्वं धर्मो यस्य मम सोहं सत्यधर्मस्तस्मै तदात्मभूताय मेऽर्थः दृष्टये दर्शनाय पूषन्नित्यादीनि नामा
मामंत्रणार्थानि सवितुः एकर्षे एकश्चासावृषिश्च एकर्षिः दर्शनादृषिः स हि सर्वस्य जगतः आत्माऽयं चक्षुश्च सन् सर्वं पश्यत्येको वा गच्छति

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह
रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥ २५ ॥

यो कर्षिः सर्पण एकाकी चरतीति मंत्रवर्णाद्यमः सर्वं हि जगतः संयमनं त्वत्कृतं सूर्य सुष्ठु ईरयते रसान्रश्मीन्प्राणान्धियो वा जगत इति प्राजा
पत्य प्रजापतेरीश्वरस्यापत्यं हिरण्यगर्भस्य वा हे प्राजापत्य व्यूह विगमय परश्मीन्समूह संक्षिपात्मनस्तेजो येनाहं शक्नुयां द्रष्टुं तेजसा त्यपहतदृष्टि
र्न शक्नुयां त्वत्स्वरूपमंजसा द्रष्टुं विद्योतन इव रूपाणामतः उपसंहर तेजः यत्ते तव रूपं सर्वकल्याणानामतिशयेन कल्याणं कल्याणतमं तत्ते पश्या
मि पश्यामो वयं वचनव्यत्ययेन यो सौ भूर्भुवः स्वर्व्याहृत्यवयवः पुरुषः पुरुषाकृतित्वात्पुरुषः सोहमस्मि भवामि अहरहमिति चोपनिषद्ज्ञत्वात् आदि

[illegible] २५ ॥
राम०
२६०

गायत्र्यामुखमविज्ञायार्थवादरूपतो एतद्धि किल वै समर्थितेन तत्र गायत्रीविज्ञानविषये जनको वैदेहः बुडिलो मनामतो अश्वतराश्वि सायस्यमाश्वतराश्वि
लं किल लोकेवानायद्व इति वितर्के हो अहो इत्येतयत्वं गायत्रीविद्ब्रूयाः। गायत्रीविदस्मीति यद्ब्रूयाः। किमिदं तस्य वचसोऽननुरूपमथ कथं य
द्गायत्रीवितत्प्रतिग्रहदोषेणाहस्तीभूतो वहसीति स प्रत्याह राजा स्मारितो मुखं गायत्र्याः हि यस्मादस्या हे सम्राट् न विदांचकर न विज्ञा

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथा अथ कथं हस्तीभूतो वहसीति मु
खं ह्यस्याः सम्राण्न विदांचकरेति होवाच तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संद
हत्येवं हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ८ चतुर्दशं ब्राह्मणं ॥

तवानस्मीति ह उवाच एकं मम विकलत्वात्ता गायत्रीविज्ञानं मम फलं जातं शृणु तर्हि तस्या गायत्र्याः अग्निरेव मुखं यदि ह वै अपि बह्विवेंधनं अग्नाव
भ्यादधति लौकिकाः सर्वमेव तत्संदहत्येवेंधनमग्निरेवं ह एव एवं वित् गायत्र्या अग्निमुखमित्येवं वेत्तीत्येवं वित्स्यात्तात्त्वयं गायत्र्यात्माग्निमुखः सन्
यद्यपि बह्विव पापं कुरुते प्रतिग्रहादिदोषं तत्सर्वं पापजातं संप्साय सम्यक् भक्षयित्वा शुद्धोऽग्निवत्पूतश्च तस्मात्प्रतिग्रहदोषात्ता गायत्र्यात्माऽजरो
ऽमृतश्च संभवति ८ सप्तमस्य चतुर्दशं ब्राह्मणं

बृ॰ टी॰ २५९ तस्या उपस्थानं तस्या गायत्र्या उपस्थानं नमस्करणमनेन मंत्रेण कोसौ मंत्र इत्याह हे भगवति गायत्रि असि त्वं भवसि त्रैलोक्यपादेनैकपदी त्रयीवि
द्यारूपेण द्वितीयेन द्विपदी प्राणादिना तृतीयेन त्रिपद्यसि चतुर्थेन तुरीयेण चतुष्पद्यसि एवं चतुर्भिः पादैरुपासकैः पद्यसे ज्ञायसे अतः परं परे
ण निरुपाधिकेन स्वेनात्मनापदसि अविद्यमानं पदं यस्याः सा त्वमपदसि यस्मान्नहि पद्यसे नेति नेत्यात्मत्वात् । अतो व्यवहारविषयाय
नमस्ते तुरीयाय दर्शताय पदाय परोरजसे असौ शत्रुः पाप्मा त्वत्प्राप्तिविघ्नकरः अदस्तदात्मनः कार्यं यत्त्वत्प्राप्तिविघ्नकर्तृत्वं मा प्राप्नो

तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शता
य पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्य
ते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा २३ ॥ ७ ॥ ७ ॥

व प्राप्नोतु इति शब्दो मंत्रपरिसमाप्त्यर्थः । यं द्विष्यात्तं प्रति द्वेषं कुर्यात्स्वयं विद्वांस्तं प्रत्यनेनोपस्थानम् असौ शत्रुरमुकनामेति नाम गृह्णीयाद् अस्मै प राम॰
रदत्ताय अभिप्रेतः कामो मा समृद्धि समृद्धिं मा प्राप्नोतु इति चोपतिष्ठते न हैवास्मै देवदत्ताय स कामः समृध्यते कस्मै यस्मा एवमुपतिष्ठते अहमदो दे २५९
वदत्ताभिप्रेतं प्रापमिति वोपतिष्ठते असावदो मा प्रापदित्यादित्रयाणां मंत्रपदानां यथाकामं विकल्पः ॥ २३ ॥ ७ ॥

सइमांस्त्रीन्स्यो गायत्रीवित् इमान्भूरादीस्त्रीन्गोश्वादिधनपूर्णान्लोकान्प्रतिगृह्णीयात्प्रतिग्रहः अस्या गायत्र्या एतत्प्रथमं पदं यद्याप्त्वात माप्नुया
यात् प्रथमस्य पदविज्ञानफलं तेन भुक्तं स्यान्नत्वधिकदोषोत्पादकः स प्रतिग्रहः। अथ पुनर्यावती इयं त्रयीविद्याय स्तावत्प्रतिगृह्णीयात् सोस्या एतद्द्विती
यं पदमाप्नुयात् द्वितीयपदविज्ञानफलं तेन भुक्तं स्यात्। अथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात् सोस्या एतत्तृतीयं पदमाप्नुयात्। तेन तृती
यपदविज्ञानफलं भुक्तं स्यात्कल्पयित्वेदमुच्यते यास्त्रय सममपि यदि कश्चित्प्रतिगृह्णीयात्तत्पादत्रयविज्ञानफलस्यैव क्षयकारणं न तस्म
स्य दोषस्य कर्तृत्वे क्षमं न चैवं दाता प्रतिग्रहीता वा प्राप्यते त्रीविज्ञानस्य तथैव कल्प्यते दाता प्रतिग्रहीता च यद्यप्येवं संभाव्यते नासौ प्रतिग्र

सयस्त्रमाइस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात् सोस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात् सोस्या एतद्द्वितीयं प
दमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात् सोस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति
नैवं केनचनाप्यं कुत उ एतावत्प्रतिगृह्णीयात् २२ ॥

हीपराधहृन्मतः कस्मात् यतोभ्यधिकमपि पुरुषार्थविज्ञानमवशिष्टमेव चतुर्थपादविषयं गायत्र्यास्तद्दर्शयत्यथास्या एतदेव तुरीयं दर्शतं पदं प
रोरजा य एष तपति यच्चैतन्नैव केनचन केनचिदपि प्रतिग्रहेणाप्यं नैव प्राप्यमित्यर्थः। यथा पूर्वोक्तानि त्रीणि पदानि तान्यपि नैव प्राप्यानि केन
चित्कल्पयित्वैवमुक्तं परमार्थतः कुत उ एतावत्प्रतिगृह्णीयात्त्रैलोक्यादिसमं तस्मात् पदत्रयं प्रकारोयायास्येत्यर्थः॥ २२ ॥

उ॰टी॰
२५६

२५१

उत्थंतथोपासनानंतरमुक्थत्थंशस्त्रंतद्विषधानंमहाव्रतेऋतौर्विद्युनमाउकत्थं प्राणोवाउकत्थंप्राणास्त्रप्रधानउकत्थंचसर्वेशास्त्राणामतउकत्थमित्युपासी
तकथंप्राणाउत्थमित्याहप्राणोहियस्मादिदंसर्वमुत्थापयतिउच्छापयनातउक्थंप्राणोनत्यप्राणाः कश्चिदुत्तिष्ठतितउपासनफलमाहाउतहअस्मादेवंविद
उकत्थवितप्राणविनवीरःसुव्रउत्तिष्ठतिहदृष्टमेतत्फलमदृष्टंतुकत्थस्यसायुज्यंसलोकतांजयतियएवंवेदयजुरितिवीयोसीतप्राणोवैप्राणोवै
यजुःकथंयजुःप्राणाःप्राणोहियस्मात्सर्वाणिभूतानियुज्यन्तेनत्यस्मिन्नियाणोहि नचितत्कस्यचिद्योगसामर्थ्यमतोयुनक्तीतिप्राणोयजुः एवंविदःफ
लमाहयुज्यन्तेउप्यमेतस्मस्थैःह अस्मैएवंविदेसर्वाणिभूतानिश्रैष्ठ्यायअस्मैश्रैष्ठ्यायपयजुषःप्राणस्यसायुज्यमि
उकथंप्राणोवाउकथंप्राणोहीदंःसर्वमुत्थापयतिउद्धास्मादुकत्थविदउत्तिष्ठत्युकत्थस्यसायुज्यंसलोकतांजयतियएवंवेदयजुःप्राणोवैय
जुःप्राणोहीमानिसर्वाणिभूतानियुज्यन्तेयुज्यन्तेहास्मैसर्वाणिभूतानिश्रैष्ठ्यायपयजुषःसायुज्यंसलोकतांजयतियएवंवेद १५ सामप्राणो
वैसामप्राणोहीमानिसर्वाणिभूतानिसम्यञ्चिसम्यञ्चिहास्मैसर्वाणिभूतानिश्रैष्ठ्यायकल्पन्तेसाम्नःसायुज्यंसलोकतांजयतियएवंवेदक्षत्रं
त्रंप्राणोवैक्षत्रंप्राणोहिवैक्षत्रंत्रायतेहैनंप्राणःक्षणितोःप्रक्षत्रमत्रमाप्नोतिक्षत्रस्यसायुज्यंसलोकतांजयतियएवंवेद १६ त्रयोदशंब्राह्मणं
स्यादिसर्वसमानं १५ सामेतिचोपासीतप्राणंप्राणोवैसामकथंप्राणःसामप्राणोहियस्मात्सर्वाणिभूतानिसम्यञ्चिविक्षगच्छंतेसंगमनात्साम्यतापत्तिहेत्व
त्वात्साम प्राणाःसम्यञ्चिसंगच्छंतेह अस्मैसर्वाणिभूतानिनकेवलंसंगच्छंते श्रैष्ठ्यायभावायपचाहेकल्प्यन्तेसमर्थ्यन्तेसाम्नःसायुज्यमित्यादिपूर्ववत्प्राणं प्राणं
क्षत्रमित्युपासीतप्राणोवैक्षत्रंप्रसिद्धमेतत्प्राणोहवैक्षत्रंकथंप्रसिद्धतेत्यः हृत्याय तेयात्मयमेनाॅपिंडदेहंप्राणाःक्षणितोःक्षणनारशस्त्रादिहिंसितात्त्रायन
र्मेमेनापूरयक्षियस्मात्रस्मात्क्षत्रंत्राणात्प्रसिद्धंक्षत्रंप्राणस्यादिहतफलमाहप्रक्षत्रमत्रंनत्रायतेऽन्येनकेनचिदित्यत्रक्षत्रंप्राणास्तमत्रंक्षत्रंप्राणं

प्राणोतीत्यर्थः। शास्त्रजरेवायाठात्क्षत्रमात्रप्राप्नोतिप्राणोस्यत्र
गीतमर्थः। क्षत्रस्यसायुज्यंसलोकतांजयतियएवंवेद १६ सप्तमस्य
त्रयोदशंब्राह्मणं

२५६

नमेवंवादिनंसपिताहस्मऽआहपाणिनाहस्तेननिवारयन्माऽऽहेदमेवंवदीःकस्मादनयोरन्नप्राणयोरेकधाभूयंभूत्वापरमतांकस्मा
गच्छतामनन्तरंकिञ्चिदपिविद्वानेनेनब्रह्मदर्शिनेनपरमतांगच्छतातस्मान्नैवंवक्तुमर्हसिकस्तुसोऽभावितिपर्यवेदंवदेन्मेवोक्त्वाकथयत्कःपर
मतांगच्छतीतितस्माऽउहप्येतद्धस्मप्रातृदंवचउवाच।किंतत्त्वविद्वानित्यन्नंतदिदंप्रत्यन्नंवैविअन्नेहियस्मादिमानिसर्वाणिभूतानि
विष्टान्याश्रितान्यतोऽन्नंवीत्युच्यते।किंचरमितिप्रोक्तवान्यत्ताकिंपुनस्तद्रंप्राणोवैरंकुतइत्याहप्राणेहियस्माद्बलाश्रयेएतेसर्वा

सहस्माहपाणिनामाप्रातृदकस्त्वेनयोरेकधाभूयंभूत्वापरमतांगच्छतीतितस्माउहैतदुवाचवीत्यन्नंवैव्यन्नेहीमानिसर्वा
णिभूतानिविष्टानिरमितिप्राणोवैरंप्राणोहीमानिसर्वाणिभूतानिरमन्तेसर्वाणिहवाअस्मिन्भूतानिविशन्तिसर्वाणि
भूतानिरमन्तेयएवंवेद १४ द्वादशंब्राह्मणं॥ ७ ॥ ७ ॥ ७ ॥

णिभूतानिरमन्तेऽतोरंप्राणः।सर्वभूताश्रयणान्नंसर्वभूतरतिगुणश्चप्राणोनहिकश्चिदनायतनोनिराश्रयोरमतेनापिसत्यप्राणनेऽ
प्राणोऽर्वलोरमतेपन्नमाणीवलवांस्तुनदाङ्गार्थमात्मानंमन्यमानोरमतेलोकःएवंस्यात्साध्वयंचाध्यायकइत्यादिश्रुतेः।इदा
नीमेवंविदःफलमाहसर्वाणिहवाअस्मिन्भूतानिविशन्त्यन्नगुणज्ञानात्सर्वाणिभूतानिरमन्तेप्राणगुणज्ञानाद्यएवंवेद १४ स
प्तमस्यद्वादशंब्राह्मणं॥

बृह० न्यस्यैव हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनं विधित्सन्नाह तदिति हृदयं ब्रह्म परामृष्टं वै इति स्मरणार्थं तद्यत् हृदयं ब्रह्म स्मर्यते इत्येकमक्ष
२५१ रं तदेतदुच्यते प्रकारान्तरेणेति द्वितीयस्तच्छब्दः किं पुनस्तत्व कोनैरमेतदेव एतदिति वक्ष्यमाणं सत्यमिति तृतीयस्तच्छब्दः एतदिति वक्ष्यमा
णं वस्तु सन्निधीकृत्याह आस इव भूव किं पुनरेतदेवास्य प्रकृतं हृदयं ब्रह्मेति तदिति तृतीयस्तच्छब्दो विनियुक्तः किं तदित्याह विशेषतो नि
र्दिश्यते सत्यमेव सच्च त्यच्च मूर्तं चामूर्तं च सत्यं ब्रह्म पञ्चभूतात्मकमित्येतत् स यः कश्चित्सत्यात्मानमेतं महन्महत्वाद्यक्षं पूज्यं प्रथम

251

तद्वैतदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमांल्लोकान् जित इन्न्वसावसद्य एव
मेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म ५ चतुर्थं ब्राह्मणं॥ ४ ॥ छ ॥

जं प्रथमं जातं सर्वस्मात्संसारिणः एतदेवाग्रे जातं ब्रह्मातः प्रथमजं वेद विजानाति सत्यं ब्रह्मेति तस्येदं फलमुच्यते। यथा सत्येन ब्रह्मणा
इमे लोका आत्मसात्कृता जिता एवं सत्यात्मानं ब्रह्म महद्यक्षं प्रथमजं वेद स जयतीमांल्लोकान् किं च जितो वशीकृतः इन्नु त्वयं यथा ब्र
ह्मणा असौ शत्रुरिति वाक्यशेषः। असच्च असद्भवेत्सो शत्रुर्जितो भवेदित्यर्थः। कस्यैतत्फलमिति पुनर्निगमयति य एवमेतन्महद् एप०
यक्षं प्रथमजं वेद सत्यं ब्रह्मेति अतो विद्यानुरूपं फलं युक्तं सत्यं ह्येव यस्माद्ब्रह्म ५ सप्तमस्य चतुर्थं ब्राह्मणं ४॥ छ ॥ २५१

तत्र हृदयनामाक्षरविषयमेव तावदुपासनमुच्यते तदेतत् हृदयमिति नाम त्र्यक्षरं त्रीण्यक्षराण्यस्येति त्र्यक्षरं कानि पुनस्तानि त्रीण्य-
क्षराण्युच्यन्ते हृ इत्येकमक्षरमभिहरंति हृतेराहरतिकर्मणो हृ इत्येतद्रूपमिति यो वेद यस्मै हृदयाय ब्रह्मणे स्वाश्चेंद्रियाण्यन्ये च वि-
षयाः शब्दादयः स्वं स्वं कार्यमभिहरंति हृदयं च भोक्त्रर्थमभिहरत्यतो हृदयनाम्नो हृद इत्येतदक्षरमिति यो वेदास्मै विदुषेऽभिहरंति
स्वाश्च ज्ञातयोऽन्ये चासंबंधा बलिमिति वाक्यशेषः विज्ञानानुरूप्येणैतत्फलं तथा द इत्येतदप्येकमक्षरमेतदपि दा नार्थस्य ह्

तदेतत् त्र्यक्षरं हृदयमिति हृ इत्येकमक्षरमभिहरंत्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद
यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ४ इति तृतीयं ब्राह्मणं ॥ ४ ॥ ४ ॥

नेर्द इत्येतत् रूपं हृदयनामाक्षरत्वेनानिबद्धमत्रापि हृदयाय ब्रह्मणे स्वाश्च करणान्यन्ये च विषयाः स्वं स्वं वीर्यं ददति हृदयं च भोक्त्रे ददाति
स्वं वीर्यमतो दकार इत्येवं यो वेदास्मै ददति स्वाश्चान्ये च तथा यमित्येतदप्येकमक्षरमिणो गत्यर्थस्य यमित्येतद्रूपमस्मिन्नक्षरे नि-
बद्धमिति यो वेद स स्वर्गं लोकमेति एवं नामाक्षरादपीदृशं विशिष्टं फलं प्राप्नोति किमु वक्तव्यं हृदयस्वरूपोपासनादिति हृदयस्तु-
तये नामाक्षरोपन्यासः ४ सप्तमस्य तृतीयं ब्राह्मणं ॥ ३ ॥

बृ॰ टी॰ चहृदयादिप्रपाठकेष्वेकत्वात्मात्मलोकानि ह्वीरितः परं ब्रह्म उपायविशेषस्तस्याधिगमेभ्यस्त्वानस्त्वोयेयस्तु स एवात्मा पश्चाद्धर्मेभ्या नञ्चादेशो नेतीति निर्दि-
२४३ ष्टः स एव पंचमेऽप्याराणपरोपन्यासेन शाकल्ययाज्ञवल्क्यसंवादेनिर्द्धारितः पुनः पंचमसमाप्तौ पुनर्जनकयाज्ञवल्क्यसंवादे पुनरिहोपनिषत्समा-
प्तौ च तस्मीमपि प्रपाठकान्नामेतदात्मनिष्ठता नान्यांतरालेकश्चिदपि विवक्षितोऽर्थः इत्येतत्प्रदर्शनायांत उपसंहारः स एष नेति नेत्यादिः स्मा-
२५७ त्मकारणात्तेनापि निरूप्यमाणेन तत्त्वे नेति नेत्यात्मैवेनिष्ठनान्योपलभ्यते तर्केणावागमेनवा तस्मादेतदेवामृतत्वसाधनं यदेतन्नेतिनेत्यात्म-

स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसंगो न हि सज्यतेऽसितो न व्यथते न रिष्यतीति विज्ञातारमरे केन विजानीयादि-
त्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ६ पंचमं ब्राह्मणं॥ ५ ॥

परित्यागं सर्वसंन्यासस्त्वेतमर्थमुपसंजिहीर्षन्नाह एतावदेतावन्मात्रं यदेतन्नेतिनेत्यद्वैतात्मदर्शनमिदं चामृतत्वसहकारिकारणनिरपेक्ष-
मेवारे मैत्रेय्यमृतत्वसाधनं यत्पृष्टवत्यसि यदेव भगवान्वेत्थ तदेव मे ब्रूहीत्यमृतत्वसाधनमिति तदेतावदेवेति विज्ञेयं त्वया इति ह ए-
वं किलामृतत्वसाधनमात्मज्ञानं प्रियायै भार्यायै उक्त्वा याज्ञवल्क्यः किं कृतवान् यत्पूर्वं प्रतिज्ञातं प्रव्रजिष्यन्न स्मीति तच्चकार विजहा- राम॰
र प्रव्रजितवानित्यर्थः परिसमाप्ता ब्रह्मविद्यासंन्यासपर्यवसानाएतावाननुपदेश एतद्वेदनुशासनमेषा परमा निष्ठा एष पुरुषार्थकर्त्त- २४३
व्यतान्तइति॥ ८ ॥ ॥

पूर्वेण भूतमात्रासंसर्गविशेषलब्धविशेषविज्ञानमलमिव विलायितं विषयविशेषविज्ञाने तन्निमित्ते च भूतसंसर्गेण प्रेत्य संज्ञास्तीत्येवं याज्ञवल्क्येनोक्ता
सा होवाच मैत्रेय्यत्रैव मा भगवानेतस्मिन्नेव वस्तुनि विज्ञानघन एवैतेभ्यः संज्ञास्तीति मोहान्तं मोहमध्यमापीपिपत् आपीपदत् अत्रैव गमितवान्
सि संमोहितवानसीत्यर्थः अतो न वै अहमिममात्मानमुक्तलक्षणं विजानामि विवेकत इति स होवाच नाहं मोहं ब्रवीम्यविनाशी वा अरेऽयमा

तेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमा
पीपिपन्न वा अहमिमं विजानामीति स होवाच न वा अरे अहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा यत्र हि द्वैतमिव भवति
तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर
इतरं स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत्तत्
केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयाद्येनेदं सर्वं विजानाति तं केन विजानीयात् ॥ ५ ॥

त्मायतः विनष्टुं शीलमस्येति विनाशी न विनाशी अविनाशी विनाशशब्देन विक्रियात्माविनाशी त्वविक्रिय आत्मेत्यर्थः अरे मैत्रेय्ययमात्मा
अतोऽनुच्छित्तिधर्मा उच्छित्तिरुच्छेदः उच्छेदोऽन्तो विनाशः उच्छित्तिर्धर्मोऽस्येति उच्छित्तिधर्मा न उच्छित्तिधर्मा अनुच्छित्तिधर्मा नापि विक्रियाल
क्षणोऽन्यो पक्षेदलक्षणो नाशोऽस्य विद्यत इत्यर्थः ॥ ५ ॥ १४ ॥ २ ॥

२४२ 242 वतर्थेशब्दनिश्वासेनैवलोकाद्यर्थेनिश्वासःसामर्थ्यादुक्तोभवतीतिदृष्टान्तः उहतम्सर्वशास्त्रार्थोपसंहारइतिकृत्वार्थप्राप्तोप्यर्थःस्पष्टीकर्त्तुं
सयथादुंदुभेर्हन्यामानस्यनवाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणायदुंदुभेस्तुग्रहणेनदुंदुभ्याघातस्यवाशब्दोगृहीतः॥सयथाशंखस्यध्मायमान
स्यनवाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणायशंखस्यतुग्रहणेनशंखध्मस्यवाशब्दोगृहीतः॥सयथावीणायैवाद्यमानायैनवाह्याञ्छब्दाञ्छक्नुयाद्ग्र
हणायवीणायैतुग्रहणेनवीणावादस्यवाशब्दोगृहीतः॥सयथार्द्रैधाग्नेरभ्याहितस्यपृथग्धूमाविनिश्चरंत्येवंवाअरेस्यमहतो
भूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोथर्वांगिरसइतिहासःपुराणंविद्याउपनिषदःश्लोकाःसूत्राण्यनुव्याख्या
नानिव्याख्यानानीष्टंहुतमाशितंपायितमयंचलोकःपरश्चलोकःसर्वाणिचभूतान्यस्यैवैतानिसर्वाणिनिश्वसितानि
सयथासर्वासामपांसमुद्रएकायनमेवंसर्वेषांशब्दानांस्पर्शानांत्वगेकायनमेवंसर्वेषांरसानांजिह्वैकायन
मेवंसर्वेषांगंधानांनासिकैकायनमेवंसर्वेषांरूपाणांचक्षुरेकायनमेवंसर्वेषांशब्दानांश्रोत्रमेकायनमेवंसर्वेषा
ंसंकल्पानांमनएकायनमेवंसर्वासांविद्यानांहृदयमेकायनमेवंसर्वेषांकर्माणांहस्तावेकायनमेवंसर्वेषामानंदानामु
पस्थएकायनमेवंसर्वेषांविसर्गाणांपायुरेकायनमेवंसर्वेषामध्वनांवागेकायनं॥सयथासैंधवघनोऽनंतरोबाह्यःकृत्स्नोरसघनए राम० २४२
वैवंवाअरेयमात्मानंतरोबाह्यःकृत्स्नःप्रज्ञानघनएवै ४॥
यदितिदृष्टान्तउच्यतेसर्वकार्यप्रलयेविद्यानिमित्तेसैंधवघनवदनंतरोबाह्यःकृत्स्नःप्रज्ञानघनएकआत्मावतिष्ठतेनेतरत् ४ ॥

आत्मनिखलुअरेमैत्रेपिदृष्टेकथंदृष्टआत्मनीत्युच्यतेपूर्वमाचार्यागमाभ्यांश्रुतेपुनस्तर्केणोपपत्त्यामतेविचारितेश्रवणंत्वागममात्रेणात्मतेऽप
सहोवाचनवाअरेपत्युःकामायपतिःप्रियोभवत्यात्मनस्तुकामायपतिःप्रियोभवतिनवाअरेजायायैकामायजायाप्रियाभवत्यात्मनस्तुकामाय
जायाप्रियाभवतिनवाअरेपुत्राणांकामायपुत्राःप्रियाभवंत्यात्मनस्तुकामायपुत्राःप्रियाभवंतिनवाअरेवित्तस्यकामायवित्तंप्रियंभवत्या
त्मनस्तुकामायवित्तंप्रियंभवतिनवाअरेपशूनांकामायपशवःप्रियाभवंत्यात्मनस्तुकामायपशवःप्रियाभवंतिनवाअरेब्रह्मणःकामाय
ब्रह्मप्रियंभवत्यात्मनस्तुकामायब्रह्मप्रियंभवतिनवाअरेक्षत्रस्यकामायक्षत्रंप्रियंभवत्यात्मनस्तुकामायक्षत्रंप्रियंभवतिनवाअरेलो
कानांकामायलोकाःप्रियाभवंत्यात्मनस्तुकामायलोकाःप्रियाभवंतिनवाअरेदेवानांकामायदेवाःप्रियाभवंत्यात्मनस्तुकामायदेवाःप्रि
योभवंतिनवाअरेवेदानांकापवेदाःप्रियाभवंत्यात्मनस्तुकामायवेदाःप्रियाभवंतिनवाअरेभूतानांकामायभूतानिप्रियाणिभवंत्या
त्मनस्तुकामायभूतानिप्रियाणिभवंतिनवाअरेसर्वस्यकामायसर्वंप्रियंभवत्यात्मनस्तुकामायसर्वंप्रियंभवत्यात्मावाअरेद्रष्टव्यः
श्रोतव्योमंतव्योनिदिध्यासितव्योमैत्रेय्यात्मनिखल्वरेदृष्टेश्रुतेमतेविज्ञातइदंसर्वंविदितं॥ब्रह्मतंपरादाद्योऽन्यत्रात्मनोब्रह्मवेदक्षत्रंतं
परादाद्योऽन्यत्रात्मनःक्षत्रंवेदलोकास्तंपरादुर्योऽन्यत्रात्मनोलोकान्वेददेवास्तंपरादुर्योऽन्यत्रात्मनोदेवान्वेदवेदास्तंपरादुर्योऽन्यत्रात्मनोवे
दान्वेदभूतानितंपरादुर्योऽन्यत्रात्मनोभूतानिवेदसर्वंतंपरादाद्योऽन्यत्रात्मनःसर्वंवेदेदंब्रह्मेदंक्षत्रमिमेलोकाइमेदेवाइमेवेदाइमानिभूता
न्यापश्चाद्विज्ञातेएवमेतत्रान्यद्योतिनिद्रीरितोकिंभवतीत्युच्यतेइदंसर्वंविदितंभवतिइदंसर्वमितिपदात्मनोऽन्यदात्मा॥नेदंसर्वमस्यमात्मा २
व्यतिरेकेणाभावा ३

बृ॰ ह्ये मैत्रेयीति ज्येष्ठां भार्यामामंत्रयामास आमं अथोवाच ह प्रव्रजिष्यन्वा अरि प्राऽपंक रिष्यन्वै अरे मैत्रेयि अस्मास्थानादार्हं स्थ्यादहमस्मिभवामि
२४१ मैत्रेय्यन्तु जानीहिमां हंते छसि पदि तेऽनया कात्यायन्यांतं करवाणीत्य दिव्याख्यातं सैव मुक्तोवाच मैत्री सर्वेयं पृथिवी वित्तेन पूर्णा स्यात्तु किं स्यां किम

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेहमस्मात्स्थानादस्मि हंत तेनया कात्यायन्यांतं करवाणीति साहोवाच मैत्रैयी यन्नुम
इयंभगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यान्वहं तेनामृता हो नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते
जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति। साहोवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेत्थ तदेव मे
ब्रूहीति सहोवाच याज्ञवल्क्यः प्रिया वै खलु नो भवति सती प्रियमवृधद्धंत तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदि
ध्यासस्वेति॥ २॥ छ ॥

हंवित्तसाधनेन कर्मणामृता आहो न स्यामिति नेति होवाच याज्ञवल्क्य उन्पादिसमानमन्यन्सहोवाच प्रियैव पूर्वं खलु नोऽस्मभ्यं भवतीभ राम॰
वंती सती प्रियमवृधद्धंत वनीनिर्द्धारितवत्यस्यतः तुष्टो हं हं ते छसि चेदमृतत्वसाधनं ज्ञातुं हे भवति ते तुभ्यं तदमृतत्वसाधनं व्याख्यास्या २४१
मि २॥

आगमप्रधानेन मधुकाण्डेन ब्रह्मतत्त्वं निर्धारितं पुनस्तस्यैवोपपत्तिप्रधानेन याज्ञवल्कीयेन काण्डेन पक्षप्रतिपक्षपरिग्रहं कृत्वा विगृह्यवादेन
विचारितं शिष्याचार्यसंबंधेन च षष्ठे प्रश्नप्रतिवचनन्यायेन सविस्तरं विचार्योपसंहृतं अथेदानीं निगमनस्थानीयं मैत्रेयीब्राह्मणमार
भ्यते अयं च न्यायो वाक्यकोविदैः परिगृहीतो हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति अथवा आगमप्रधानेन मधुकाण्डेन यदमृ
तत्वसाधनं ससंन्यासमात्मज्ञानमभिहितं तदेव तर्केणाप्यमृतत्वसाधनं ससंन्यासमात्मज्ञानमधिगम्यते तर्कप्रधानेन हि याज्ञवल्की
येन काण्डेन तस्माच्छास्त्रतर्काभ्यां निश्चितमेतदात्मज्ञानं ससंन्यासममृतत्वसाधनमिति तस्माच्छास्त्रश्रद्धावद्भिरमृतत्वप्रतिपित्सुभि

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञव

ल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥१॥

रेतत्प्रतिपत्तव्यमिति आगमोपपत्तिभ्यां हि निश्चितोऽर्थः श्रद्धेयो भवत्यव्यभिचारादिति वाक्यकाराणां
त्वं च तदर्थं पर्याप्यास्व्यातोऽर्थस्तथा प्रतिपत्तव्यो वा अपि याज्ञवल्क्यशपथ्यास्व्यातानि तानि व्याख्यास्यामः अथेति हेत्वपदेशानन्तर्यप्रदर्शनार्थो
हेतुप्रधानानि हि वाक्यान्यतीतानि तदनन्तरमागमप्रधानेन प्रतिज्ञातोऽर्थो निगम्यते मैत्रेयीब्राह्मणेन हशब्दो वृत्तावद्योतको याज्ञवल्क्
स्य ऋषेः किल द्वे भार्ये पत्न्यौ बभूवतुरास्तां मैत्रेयी च नामत एका कात्यायनी नामतोऽपरा तयोर्मैत्रेयी ह किल ब्रह्मवादिनी ब्रह्मवदनशी
ला बभूव आसीत् इतरा स्त्रीप्रज्ञा स्त्रियां या प्रज्ञा सा स्त्रीप्रज्ञा सैव यस्याः सा स्त्रीप्रज्ञा गृहप्रयोजनान्वेषणालक्षणा सा स्त्रीप्रज्ञा एव तर्हि तस्मिन्काले आसी
त्कात्यायनी अथैवं सति ह किल याज्ञवल्क्यः पूर्वस्मादाश्रमाद्गार्हस्थ्यलक्षणाद्वृत्तान्तरं पारिव्राज्यलक्षणं वृत्तमुपाकरिष्यन्नुपाचिकीर्षुः स ॥ १ ॥

बृही
२३२
292

अंधमदर्शनात्मकं तमः संसारनियामकं प्रविशंति प्रतिपद्यंते के ये ऽविद्यां विद्यातो ऽन्यां साध्यसाधनलक्षणामुपासते कर्मानुवर्त्तंत इत्य
र्थः ततस्तस्मादपि भूय इव बहुतरमिव तमः प्रविशंति के ये उ विद्यायामविद्यावस्तुप्रतिपादिकायां कर्मार्थायां त्रय्यामेव विद्यायां र
ता अभिरता विधिप्रतिषेधपर एव वेदो नान्यो ऽस्ति उपनिषदर्थानपेक्षिण इत्यर्थः ॥ यदि तेऽदर्शनलक्षणं तमः प्रविशंति को
दोष इत्युच्यते अनंदाः अनानंदाः असुखा नाम ते लोकास्तेनांधेनादर्शनलक्षणेन तमसावृता व्याप्तास्ते तस्य अज्ञानतमसो
गोचरास्तांस्ते प्रेत्य मृत्वा अभिगच्छंत्यभियांति के ये अविद्वांसः किं सामान्येनाविद्वत्तामात्रेणेत्युच्यते अबुधः बुधेरवगमनार्थ
स्य धातोः क्विप्प्रत्ययांतस्य रूपं आत्मावगमवर्जिता इत्यर्थः जनाः प्राकृता एव जननधर्मिणो वेत्येतत् १२ आत्मानं स्वपरं सर्वप्राणि
अंधंतमः प्रविशंति ये विद्यामुपासते ततो भूय इव ते तमो य उ विद्यायां रताः अनंदा नाम ते लोका अंधेन तमसावृता तांस्ते
प्रेत्याभिगच्छंत्यविद्वांसो ऽबुधो जनाः १२ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् १३

मनीषितं ज्ञेय स्थमशनायादिधर्मातीतं चेद्यदि विजानीयात्सहस्रेषु कश्चिदेवेत्यात्मविद्यायाः दुर्लभत्वं दर्शयति कथमयं परमात्मा
सर्वप्राणिप्रत्ययसाक्षी यो नेति नेत्यादिक्रमोपस्थापितात्मा योऽस्ति इष्टाऽश्रोता मंता विज्ञाता समः सर्वभूतस्थो नित्यशुद्धबुद्धमुक्तस्वभावोऽस्मि
अयमस्मीति पूरुषः पुरुषः स किमिच्छन्नस्य स्वरूपव्यतिरिक्तमन्यद्वस्तु फलभूतं किमिच्छन् कस्य वान्यस्यात्मनो व्यतिरिक्तस्य कामाय प्रयोजना
य न हि तस्यात्मन एष्टव्यं फलं न चाप्यात्मनो ऽन्योऽस्ति यस्य कामाय इच्छति सर्वस्यात्मभूतत्वात् अतः किमिच्छन् कस्य वा कामाय शरीरमनुसंज्व

देहेंद्रियोत्थ शारीरो व्याधिकृतदुःखमनु दुःखी स्याच्छरीरतापमनुतप्येत न ह्यना
त्मदर्शिनो हि तद्धातिरिक्तवस्त्वंतरेप्सोर्ममेदं स्यात्पुत्रस्येदं भार्याया इ
दमित्येवमीहमानः पुनःपुनर्जननमरणप्रबंधारूढः शारीररोगमनुज्व
रयते २४ ॥

स्तेन ब्रह्मविद्यामार्गेणाब्रह्मविदन्यो ऽपि कीदृशो ब्रह्मवित्तेनैति फलमते पूर्वं पुण्यकृद्भूत्वा पुनस्तत्को पुत्राद्येषणाः यस्मात्मतेजसा
त्मात्ते संयोज्य तस्मिन्नभिनिर्वृत्तस्तैजसश्चात्मभूतः इहैव कस्यचिदीदृशो ब्रह्मवित्तेन मार्गेणैति न पुनः पुण्यादिसमुच्चयकारि
णोऽयं ह सर्वविरोधादित्यवोचाम अत्र पुण्यपुण्यपोयस्मैयं पुनर्भवनिर्मयाः। शान्ताः समाहितो योगिनस्तेमो क्षात्मनेन मद्
ति च स्मृतेः त्यज धर्ममधर्मं चेत्यादिषु पुण्यपुण्यत्यागोपदेशात्त्रिराशिषम नारंभं निर्नमस्कारमस्तुति। अत्र हीं सांख्यरा क्रमी रा
तदेवा ब्राह्मणा विदुः। नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चो

स्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ २२ ॥ छ ॥

परमः क्रियाभ्य इत्यादिस्मृतिभ्यश्च उपदेक्ष्यति चेद्दापि न्वेष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्मणा नो कनीयानिति कर्मण
योजनाभावेऽहेतुत्वात्तस्माद्ब्राह्मणाः शान्तो दान्त इत्यादिना सर्वक्रियोपरमं दर्शयति तस्माद्यथाव्याख्यातमेव पुण्य
कृत्त्वमथवा यो ब्रह्मवित्तेनैति स पुण्यकृत्तैजसश्चेति ब्रह्मविस्तुतिरेषा पुण्यकृति तैजसे च योगिनि महाभाग्यं प्रसिद्धं लोके
ताभ्यामतो ब्रह्मवित्स्तूयते प्रख्यातमहाभाग्यत्वाल्लोके २२ ॥ छ ॥ छ ॥ छ ॥

बृ॰टी॰ तस्मिन्मोक्षसाधनमार्गे विप्रतिपत्तिर्मुमुक्षूणां कथं तस्मिन् शुक्लं शुद्धं विमलमाहुः केचित्मुमुक्षवो नीलमन्ये पिंगलमन्ये हरि
२३१ तं लोहितं च यथादर्शनं नाड्यस्त्वेताः सुषुम्नाद्याः श्लेष्मादिरसपूर्णाः शुक्लस्य नीलस्य पिंगलस्येत्याद्युक्तत्वात् आदित्यं वा मोक्षमार्ग
२३१ मेवंविधं मन्यंते एष शुक्ल एष नील इत्यादिश्रुतेः न तु दर्शनमार्गस्य च शुक्लादिवर्णसंभवात् सर्वथापि तु प्रकृतात् ब्रह्मविद्यामार्गा
दन्य एते शुक्लादयो न तु स मुक्तः शुद्धोऽद्वैतमार्गो न नीलपीतादिशब्दैर्वर्णैर्वा वाचकैः सहानुद्रवणायां शुक्लादीन्योगिनो मोक्षप

तस्मिंछुक्लमुत नीलमाहुः पिंगलं हरितं लोहितं च एष पंथा ब्रह्मणा हानुवित्तः॥ ९॥

थान्मन्यन्ते मोक्षमार्गाः संसारविषया एव हि ते चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः इति शरीरदेशान्निःसरणसंबंधाद्ब्रह्मादिलो रामं॰
कप्राप्यका हि ते तस्मात्पयमेव मोक्षमार्गो य आत्मकामत्वे नाप्तकामतया सर्वकर्मक्षयेण मनानुपपत्तौ प्रदीपनिर्वाणवच्चक्षुरादी २३१
नां कार्यकरणानामत्रैव समवनयः इत्येष ज्ञानमार्गः पंथा ब्रह्मणा परमात्मस्वरूपेणैव ब्राह्मणेन त्यक्तसर्वैषणेनानुवित्तः ९

दाप्तकामस्य ब्रह्मविदो मोक्ष इत्येतस्मिन्नर्थे मंत्रब्राह्मणोक्ते विस्तरप्रतिपादका एते श्लोका भवंति अणुः सूक्ष्मः पंथा दुर्विज्ञेयत्वा
द्वितते विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा विततः इति पाठांतरे मोक्षसाधनो ज्ञानमार्गः पुराणश्चिरंतनो नित्यश्रुतिप्रकाशि
तत्वान्न तार्किकबुद्धिप्रभवकुदृष्टिमार्गवदर्वाक्कालिकः मे स्पृष्टो मां स्पृष्टो मया लब्ध इत्यर्थो यो हि येन लभ्यते स तं स्पृशतीव
संबध्यते तेन मयायं ब्रह्मविद्यालक्षणो मोक्षमार्गो मया लब्धत्वान्मां स्पृष्ट इत्युच्यते न केवलं मया लब्धः किं तर्ह्यनुवित्तो मयैवानुवे
दनं नाम विद्यायाः परिपाकापेक्षया फलावसानतानिष्ठा प्राप्तिः भुजेरिव तृप्त्यवसानता पूर्वं तु ज्ञानप्राप्तिसंबंधमात्रमेवेति
विशेषः किमसावेवं मंत्रदृगेको ब्रह्मविद्याफलं प्राप्य नान्यः प्राप्तवान् येनानुवित्तो मयैवेत्यवधारयति नैष दोषो स्याः फल

तदेते श्लोका भवंति अणुः पंथा विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव तेन धीरा अपियंति ब्रह्मविदः स्वर्गं लोकमि
तऊर्ध्वं विमुक्ताः २

मात्मसाक्षिकमनुभवमिति ब्रह्मविद्यायाः स्तुतिपरत्वादेवं हि कृतार्थाभिमानकरणमात्मप्रत्यय
साक्षिकमात्मज्ञानं किमतः परमन्यत्स्यादिति ब्रह्मविद्यां स्तौति न तु पुनरन्यो ब्रह्मवित्तत्फलं न प्राप्नोतीति तथा योयो देवानामि
ति सर्वार्थश्रुतेश्च तदेवाह तेन ब्रह्मविद्यामार्गेण धीराः प्रज्ञावंतोऽन्येऽपि ब्रह्मविद इत्यर्थोऽपियंत्यपिगच्छंति ब्रह्मविद्याफलं मोक्षं स्व
र्गं लोकं स्वर्गलोकशब्दस्त्रिविष्टपवाच्यपि सन्निह प्रकरणान्मोक्षाभिधायकः इतोऽस्माच्छरीरपातादूर्ध्वं जीवंत एव विमुक्ताः संतः २०

बृ·टी· ऽन्यो ऽयमन्येवं धर्मो ऽकुशलाः खल्वाहुः सत्यं कामादिपूर्वके पुण्यापुण्ये शरीरग्रहणकारणे तथापि कामप्रयुक्तो हि पुरुषः पुण्यापु
२२६ ण्ये कर्मणी उपचिनोतीति कामप्रहाणे तु कर्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति उपचिते ऽपि पुण्यापुण्ये कर्मणी कामशू
226 न्ये फलारंभके न भवतस्तस्मात्काम एव संसारस्य मूलं तथा चोक्तमाथर्वणे कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्रे
ति तस्मात्काममय एवायं पुरुषो यदन्यमयत्वं तदकारणं विद्यमानमपीत्यतो ऽवधारयति काममय एवेति यस्मात्स च काममयः सन्या

यो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भव
ति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥ १२ ॥ ॐ ॥

दर्शनेन कामेन यथाकामो भवति तत्क्रतुर्भवति स कामः ईषदभिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति सो ऽविहन्यमानः स्फुटीभवन्क्रतुत्व
मापद्यते क्रतुर्नामाध्यवसायो निश्चयो यदनन्तरा क्रिया प्रवर्तते यत्क्रतुर्भवति यादृक्कामकार्येण क्रतुना यथारूपः क्रतुरस्य सो ऽयं यत्क्रतुर्भ राम०
वति तत्कर्म कुरुते यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं कर्म तत्कुरुते निर्वर्तयति यत्कर्म कुरुते तदभिसंपद्यते तदीयं फलमभिसंप २२६
द्यते तस्मात्सर्वस्य संसारित्वे च काम एव हेतुरिति १२ ॥

किंबहुनात्रदेहात्मिदृष्टमस्यपदस्यमिदंमयोगृह्यमाणादिविषयादिमयस्तस्मादयमदोमयः अदइतिपरोक्षंकार्येणागृह्यमाणोननिर्दिश्यतेअनं
तमयंतत्कारणाभावितानिविशेषाः नैवतेविशेषतोनिर्देष्टुंशक्यंतेतस्मिंस्तस्मिन्क्षणेकार्यतोवगम्यंतेइदमस्यहृदिवर्त्ततेदोस्येतितेनगृह्यमा
णाकार्येणेदंमयतयानिर्दिश्यतेपरोक्षांतस्थोव्यवहारोयमिदानीमदोमयइतिसंक्षेपतस्तुयथाकर्तुंयथावाचारतुंशीलमस्यसोय
यथाकारीयथाचारीसतीथाभवतिकरणंनामभिन्नियताक्रियाविधिप्रतिषेधादिगम्याचरणंनामानियतमितिविशेषः साधुका

स्तयदेतदिदंमयोदोमयइतियथाकारीयथाचारीतथाभवतिसाधुकारीसाधुर्भवतिपापकारीपापोभवतिपुण्यः

॥ पुण्येनकर्मणाभवतिपापःपापेन॥ ११ ॥

रीसाधुर्भवतियथाकारीतस्यादिशेषणंपापकारीपापोभवतीतिचयथाचारीतस्यताच्छील्यप्रत्ययोपादानादर्थंतत्तात्पर्यंतैवतन्मय
त्वंनतत्कर्ममात्रेणेत्याशंकाहपुण्यःपुण्येनकर्मणाभवतिपापःपापेनेतिपुण्यपापकर्ममात्रेणैवतन्मयतास्यान्नतुताच्छील्यम
पेक्षतेताच्छील्यप्रत्ययोपादानात्तुतन्मयत्वातिशयइत्ययंविशेषस्तत्रकामक्रोधादिपूर्वकपुण्यापुण्यकारितासर्वमयत्वेहेतुःसं
सारस्यकारणंदेहाद्देहांतरसंचारस्यचैतन्मयपुण्योपाध्यन्यस्मद्देहांतरमुपादत्तेतस्मात्पुण्यपुण्येसंसारस्यकारणमेतद्विषयौहिविधिप्र
तिषेधावत्रशास्त्रस्यसाफल्यमिति॥ ११

ब्र॰ह॰ यश्च श्रोत्रियोऽधीतवेदः अवृजिनो वृजिनं पापं तद्रहितो यथोक्तकारीत्यर्थः अकामहतो वीततृष्णः आजानदेवेभ्योऽर्वाक् यावन्तो विषयास्तेषु तस्य
२१८ चैवंभूतस्याजानदेवैः समान आनंद इत्येतदनेन गृह्यते चत्वारस्तु गुणीकृतपरिमाणः प्रजापतिलोक एक आनंदो विराट् शरीरे तथा तद्विज्ञानवा
न् श्रोत्रियोऽधीतवेदस्त्ववृजिन इत्यादि पूर्ववत् ततः शतगुणीकृतपरिमाणः एक आनंदो ब्रह्मलोके हिरण्यगर्भात्मनि यश्च इत्यादि पूर्ववदेवाकः
४८ परं गणितनिवृत्तेरेष परम आनंदः यस्य परमानंदस्य ब्रह्मलोकाद्यानंदा मात्रा अधीरिखवित्युक्तः एवं शतगुणोत्तरोत्कर्षेणानंदाय त्रैकतो

यश्च श्रोत्रियोऽवृजिनोऽकामहतो ये शतमाजानदेवानामानंदाः स एकः प्रजापतिलोक आनंदो यश्च श्रोत्रियोऽवृजिनोऽकामहतो य
ये शतं प्रजापतिलोक आनंदाः स एको ब्रह्मलोक आनंदो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनंदः ॥ ४८ ॥

पांति यश्च श्रोत्रियप्रत्यक्षोऽथैष स एव संप्रसारलक्षणः परम आनंदस्तत्त्वविन्मन्यपतिनान्यच्छृणोति अतो भूमामृतत्वादस्मन्तः इतरे तद्वि
परीताः अत्र च श्रोत्रियत्वावृजिनत्वे तुल्ये अकामहतत्वकृतो विशेषः आनंदशतगुणवृद्धिहेतुरत्र तानि साधनानि श्रोत्रियत्वावृजिनत्वा स्म॰
कामहतत्वानि तस्य तस्यानंदस्य प्राप्त्यर्थमभिहितानि यथा कर्मणामग्निहोत्रादीनि देवानां देवत्वप्राप्तौ ॥ ४८ ॥ ८ ॥ २१८

किंबहुनानेदंतत्विदम्मयपरयमिदंमयोगृह्यमाणविषयादिमयस्तस्मादयमदोमयः अदइतिपरोक्षंकार्येणागृह्यमाणोननिर्दिश्यतेअनं
न्ताअंतःकरणभाविताविशेषाःनैवतेविशेषतोनिर्देष्टुंशक्यंतेतस्मिंस्तस्मिन्क्षणेकार्यतोवगम्यंतेइदमस्यहृदिवर्त्ततेदोस्येतितेनगृह्यमा
णाकार्येणेदंमयतयानिर्दिश्यतेपरोक्षोंतस्थोव्यवहारोयमिदानीमदोमयइतिसंक्षेपतस्तुयथाकर्तुंयथावाचारंतुशीलमस्यसोयं
यथाकारीयथाचारीसतथाभवतिकरणंनाममियताक्रियाविधिप्रतिषेधादिगम्याचरणंनामानियतमितिविशेषः साधुका

स्मयदेतदिदंमयोदोमयइतियथाकारीयथाचारीतथाभवतिसाधुकारीसाधुर्भवतिपापकारीपापोभवतिपुण्यः

॥ पुण्येनकर्मणाभवतिपापःपापेन॥ ११ ॥

रीसाधुर्भवतियथाकारीत्यस्यविशेषणंपापकारीपापोभवतीतियथाचारीत्यस्यताच्छील्यप्रत्ययोपादानादत्यंततात्पर्यतैवतन्मय
त्वंनतत्कर्ममात्रेणोत्पाशंक्याहपुण्यःपुण्येनकर्मणाभवतिपापःपापेनेतिपुण्यपापकर्ममात्रेणैवतन्मयतास्यात्तत्ताच्छील्यम
पेक्षतेताच्छील्यप्रत्ययोपादानाद्देहतन्मयत्वातिशयस्तथैवविशेषस्तत्रकामक्रोधादिपूर्वकपुण्यापुण्यकारितासर्वकर्मयत्वेहेतुःसं
सारस्यकारणंदेहाद्देहांतरसंचारस्यचैतत्पूर्वकोह्यन्यस्माद्देहांतरमुपादत्तेतस्मात्पुण्यापुण्येसंसारस्यकारणमेतद्विषयौहिविधिप्र
तिषेधावत्रशास्त्रस्यसाफल्यमिति॥ ११

बृ.ह. यश्च श्रोत्रियोऽधीतवेदः अवृजिनो वृजिनं पापं तद्रहितो यथोक्तकारीत्यर्थः अकामहतो वीततृष्णः आजानदेवेभ्योऽर्वाक् यावंतो विषयास्तेषु तस्मा
२१८ च्चैवंभूतस्याजानदेवैः समान आनंद इत्येतदन्वाकृष्यते चशब्दात् तच्छतगुणीकृतपरिमाणः प्रजापतिलोक एक आनंदो विराट्शरीरे तथा तद्विज्ञानवा
२१८ न् श्रोत्रियोऽधीतवेद स्त्ववृजिन इत्यादि पूर्ववत् ततः शतगुणीकृतपरिमाणः एक आनंदो ब्रह्मलोके हिरण्यगर्भात्मनि यश्च श्रोत्रियादि पूर्ववदेवातः
परं गणितनिवृत्तेरेष परम आनंदः यस्य परमानंदस्य ब्रह्मलोकाद्यानंदा मात्रा उदधेरिव विप्रुषः एवं शतगुणोत्तरवृद्ध्या ये ते आनंदा यत्रैकतां

यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानंदाः स एकः प्रजापतिलोक आनंदो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ
ये शतं प्रजापतिलोक आनंदाः स एको ब्रह्मलोक आनंदो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनंद ॥ ४८ ॥

यांति यश्च श्रोत्रियत्वादिगुणोऽर्थे एष एव संप्रसादलक्षणः परम आनंदः यत्रान्यन्न पश्यति नान्यच्छृणोति अतो भूमाख्यस्तस्मादमृतः इतरे तद्वि
परीताः अत्र च श्रोत्रियत्वावृजिनत्वे तुल्ये अकामहतत्वकृतो विशेष आनंदशतगुणवृद्धिहेतुः अतस्तानि साधनानि श्रोत्रियत्वावृजिनत्वा रम०
कामहतत्वानि तस्य तस्यानंदस्य प्राप्त्यर्थानीह तानि यथाकर्मं ज्योतिष्टोमाग्निहोत्रादीनि देवानां देवत्वप्राप्तौ ॥ ४८ ॥ ६ ॥ २१८

यस्य परमानंदस्य मात्रा अवयवाः ब्रह्मादिभिर्मनुष्यपर्यंतैर्भूतैरुपजीव्यंते तदानंदमात्रावयवद्वारेण मात्रिणं परमानंदमधिजिगमयिषन्नाह सैषधवलवरणाक
श्चिन्मनुष्याणां मध्ये राद्धः संसिद्धो विकलः समयादयवद्रूपः समृद्धः भोगोपकरणसंपन्नो भवति किंचान्येषां समानजातीयानामधिपतिः स्वतंत्रः प
तिर्नेमाउलिकः सर्वैः समस्तैर्मानुष्यकैरिति दिव्यभोगोपकरणनिवृत्यर्थं मनुष्याणामेव यानि भोगोपकरणानि तैः संपन्नानामर्थात् यायेन संपन्नः संपन्न
तमः स मनुष्याणां परम आनंदस्तत्रानंदानंदिनोरभेदनिर्देशात्तात्पर्यो तरत्वमित्येतत्परमानंदस्यैवेप विषयविषयाकारेण मात्राप्रसृतेति ... पञ्चवा
अन्नादिवस्त्वादित्यादिवाक्ये नन्तस्मात् क्रोयं स्वयस आनंद उभयेहार्मिदेशोपलक्षितसादित्यो राजा ... दाहरणं इदं मनुष्यानंदमादिं कृत्वा शतगुणोत्त

स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनंदः अथ ये शतं मनुष्याणामानंदाः स एक
पितॄणां जितलोकानामानंदो अथ ये शतं पितॄणां जितलोकानामानंदाः स एको गंधर्वलोक आनंदो अथ ये शतं गंधर्वलोक आनंदाः स एकः कर्मदेवाना
मानंदो ये कर्मणा देवत्वमभिसंपद्यंते अथ ये शतं कर्मदेवानामानंदाः स एक आजानदेवानामानंदो ॥ ४७ ॥ छ ॥ छ ॥

रोत्तरक्रमेणोत्तीर्णपरमानंदे पत्रभेदो निवर्त्तते तमधिगमयति अत्र परमानंदः शतगुणोत्तरोत्तरक्रमेण वर्द्धमानो यत्र ब्रह्मादिकाशमनु भवति यत्र गणितभेदो निवर्त्ततेऽ
नदर्शन अवगम्ननन्ताभावात्तं परमानंदं दिव्य कृत्वाहाथ ये मनुष्याणां स्वेन प्रकारेण शतमानंदभेदाः स एकः पितॄणां तेषां विशेषणं जितलोकानामिति
श्राद्धादिकर्मभिः पितॄन् संतोष्य पितृत्वं तेन कर्मणा जितो लोको येषां ते जितलोकाः पितरस्तेषां पितॄणां जितलोकानां मनुष्यानंदशतगुणीकृतपरिमा
णएक आनंदो भवति सोपि शतगुणीकृतो गंधर्वलोक एक आनंदो भवति स च शतगुणीकृतः कर्मदेवानामेक आनंदो ये हि अग्निहोत्रादि श्रौत
कर्मणा ये देवत्वं प्राप्नुवंति ते कर्मदेवास्तथैवाजानदेवानामेक आनंद आजानतः उत्पत्तित एव ये देवास्त आजानदेवाः ॥ ४७ ॥

जन्मजमा[illegible] शिवः स्थाणुःस्वयंभूर्विभेदोमोर्थीतिष्ठतियोभोगेषुतिष्ठतीतितत्तिनीश्रुतिः ननुश्रीकण्ठएवकथंजग
कथंजगत्[illegible] सर्वागमेषुशिवशक्तिभ्यामेवजगद्धुवणादित्याशंक्याह तुहिनांशुमौलिर्यदंगजन्मा तुहि
नांशुश्चंद्रोमौलौमस्तकेयस्यस्मरेडांशुमौलिः शिवः सःयस्यसन्निहितानेदेकमूर्तेः श्रीकण्ठस्यसंगाज्जन्म
यस्यास्तंगायन्मांगविशेषः लिंगं उक्तंचसंहितायां तल्लिंगंभगवानुश्रम्भुर्ज्योतीरूपःसनातनः तल्लिंगस्था
२६ नीयश्चःप्रोक्ता[illegible] उत्तरोत्तरमेवानुमित्यर्थः अतश्चिवोनस्वतंत्रेणजगत्कर्तृत्वांगादंगिनःप्रधानत्वात् यदासूर्यादी
206 नांतदंगत्वेनगौणत्वेन [illegible] त्वंतथात्रापि अथशक्तिंनिरूपयति तस्यात्मज्योतिःपरमाचशक्तिरिति तस्यांगिनोभग राम.
वतःआत्मज्योतिः आत्मनःआत्मत्वेनस्वीकृतास्वीयेत्यर्थः उक्तंचात्मीयत्वेनभगवतागीतायां दैवीह्येषागुणमयीममाया ५६
दुरत्ययेतिशक्तिशक्तिमतोरभेदादितितस्यात्ममायातस्याज्योतिःप्रकाशरूपोयोनिस्थानीयोयोंशःसःशक्तिरित्युच्यते ब्रह्मसंहितायांया
योनिःसापराशक्तिःकामोबीजंमहद्धरेरितिएवंभवतोंशःशिवःभागस्यामायाअंशःशक्तिरितिशिष्टम् एवंशिवशक्तिभ्यांजग
दुत्पद्यतेएतदेवसर्वव्यवस्थापरत्वियागेनप्रतिपादयंत्येके ननुकीदृशीयंशक्तिःपरमात्मन्याभ्यअस्याअंशभूताभ्यःपर

व्याप्तिर्भेकी। तथाहि यत्र जगत्कारणत्वाभावः तत्रेश्वरपदवाच्यत्वाभावः यथा तदतिरिक्तं सर्वं ननु तदतिरि
क्तं सर्वमित्यसिद्धोयं दृष्टांतः ब्रह्मणोपि जगत्स्रष्टृत्वश्रवणादिति चेन्न ब्रह्मणः स्थूलजगदुत्पादकत्वेन सकलजगद
त्पादकत्वाभावात् ब्रह्मणोपि भगवत एवोत्पत्तिश्रवणात् यस्य नाभिरुहाद् आसीद् ब्रह्मा लोकपितामह इति तत्रो
पि यत् स्थूलभूतोत्पादकत्वं तदपि भगवदुपदिष्टतपोबलजन्यमेवेति ननु कस्माद् ब्रह्मणोत्पत्तिरसिद्धा तत्र भागवत
पद्येन प्रसिद्धा तथा च पद्यं उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे किमस्ति नास्ति व्यप
देशभूषितं तवास्ति कुक्षेः कियदप्यनंतः इति भागवतवचनात् अस्यार्थः स्वामिना गर्भगतस्य शिशोः पादयोः
क्षेपणं मातुः किं न पराधाय भवति लोके प्रसूतस्त्वभावो यस्मात् अस्ति नास्तीति व्यपदेशाभ्यां भावाभावाभ्यां
स्थूलसूक्ष्मकार्यकारणात्मकैर्भूषितं अभिहितं एवंभूतानां भुवि विषयेऽधिष्ठितं स्थितमिति वा सर्वं वस्तु तस्य
कुक्षेः अधोक्षज तव कुक्षेरनंतर्बहिः किं न यदीयं किंचिन्मात्रमपि किमस्ति न किंचिदस्तीत्यर्थः अतः सर्वस्य तत्कुक्षि
गतत्वेन ममापि तथात्वात् मातुरपराधः सोढव्य इति भावः ननु तस्तु ब्रह्मणो कस्मादुत्पत्तिः कस्यान्यस्यापि
कारणमस्तित्वासौ कार्य[illegible]निरूपणं [illegible] अकारणमिति नो विद्यते कारणं यस्य तत्कारणानित्यसिद्धत्वात्

हंतेनौमि नंकांयां अणिमाद्या अष्टयार्थदाः नंदसुनंदाद्यस्तएवगोपकाः कस्माद्वणालात् सुबलादयः अवतीर्णा
इत्यर्थः अणिमाद्येगोपरूपिणामितिउक्तंचभागवते नंदाद्याष्टौसख्यश्चेणिमाद्याहरेर्गुणाः अष्टौअणिमा
द्यागुणाहरेर्दास्यास्तेनंदाद्यइतियोजना उक्तंचबृहद्गौतमीये अत्रैस्वांशभूतानिवर्णितेरूपतः
इतिकादृशास्तेनिजरूपवंतः निजंस्वीयंयथार्थदीयंरूपंतद्वंतः यद्वानिजंकस्मात्मकंचतुर्भुजादिकंरूपंतद्वतः ननुप्र

९२ यमाश्रितागोपवराः स्वपालाद्यष्टाणिमाद्यानिजरूपवंतः
मुनिःसुदामातिसखोजजन्माजगन्मयंनौमितमद्वितीयं ६७ राम

२०३ नीतिःकुतोनजायते तत्र हस्वपालाः स्वयमेवरक्षकाः पालोरक्षकोयेषांते अत्रायमर्थः कस्मिन्नगोपरूपेणाव
स्थिताः अष्टैस्वलक्षणाइत्यर्थःहिशब्देनायमर्थोनिश्चितः उक्तंचबृहद्गौतमीयेतेजोमयमिदंस्थानमदृश्यंचर्मचक्षुषा
थात ननुअस्तुअन्येषांस्वरूपंचतुर्भुजेनादृष्टपूर्वंतत्रतयानांतुस्वावतारत्वादितिसत्यं तत्रानेवैष्णवीमायाभगवा
नजननेमनोहराणामितिभगवतासर्वेषामावरणेलक्षणवर्णनात्अथमुन्यवतारमाह अजजन्माअजाद्ब्रह्म

वस्तुनोविधिमुखेनस्वस्यैवबोधकत्वात्पीतंकवलीकृतंअवरं अवरमिवांबरंआकाशंचकुत्रस्वेवस्नेतियनुते:येनतदे
निर्गमएव भवतुप्रकरणेकिमायातंतत्राह पीतंआवरणेनग्रहीतमध्येकृतंनीलांवुदमिवसुंदरवपुर्येन नवनीला
वुदांवरयोर्भेदोस्ति आकाशस्यशून्यत्वांस्वुदस्यतद्रूपिद्रव्यत्वादितिवाच्यं जपाकुसुमोपरिनिहितस्फटिकमणेर
धिष्ठानगुणाभिनिवेशेनरक्तप्रतीतिरिवादोषात् अंवुदांवरयोररोपान्यगुणाध्यासादाहृत: मेघैर्मेदुरमंवरमितिव
स्तव: मघानांमेदुरत्वं अमेदुरेंवरेध्यस्तम् मंदंमंदंजलधराजगर्जुरनुसागरमिति ध्वन्यतीतंवुदेध्वन्यत्वारो
पावरस्य शब्दगुणमा शमित्युक्तत्वात् अन्योन्याध्यासात्स्नेहप्रतीति: यथाहमितिशरीरादावित्यलं ध्या
नार्थंपीतिगुणविष्टव्याख्याय तस्यपरस्यपीतत्वबोधकंविशेषणमाह प्रत्यग्रबालार्ककलायभासंप्रत्यग्रंप्रात:का
लीनंबालार्कमनुप्रार्थमानोप्रत्यग्रोवुध्यते।तत:किमर्थमुभयोरारोपइतिवाच्यम् बालार्कइवबालार्कोइतिव्याख्याने
घनपटलेनीहारपटलेनालीढेर्केबालार्कोतिव्यज्यतेतद्व्यानिराकरणार्थंप्रत्यग्रेतिपदाभिनिवेशःपीनस्निग्धत्वाद
नवींतत्प्रकाशाभावात् एवंपीतांवरंनरंतंवेणुंवादयंतंनौमीति ६६ इदानीतस्यावरणपार्षदानाह अ ६

बृ॰टी॰ हे याज्ञवल्क्य जनेवं संबोध्याभिमुखीकरणाय किंज्योतिरयं पुरुष इति किमस्य पुरुषस्य ज्योतिर्येन ज्योतिषा व्यवहरति सोयं किंज्योतिर
१९१ यं शाकृतः कार्यकरणसंघातरूपः शिरःपाण्यादिमान् पुरुषः पृष्टस्तेन किमयं स्वावयवसंघातवाह्यं ज्योतिरन्तरेण व्यवहरत्याहोस्वि
त्स्वावयवसंघातमध्यपातिना ज्योतिषा ज्योतिःकार्यमयं पुरुषो निर्वर्तयतीत्येतदभिप्रेत्य पृच्छति किंचातो यद्यव्यतिरिक्तेन यदि वा व्य

याज्ञवल्क्य किंज्योतिरेवायं पुरुष इत्ता ॥ २ ॥९९९९९ ॥ छ ॥

191 तिरिक्तेन ज्योतिषा ज्योतिःकार्यं निर्वर्तयति शृणु तत्र कारणं यदि व्यतिरिक्तेनैव ज्योतिःकार्यनिर्वर्तकत्वमस्यात्स्वभावो निर्धारितो भव
ति ततोऽदृष्टज्योतिःकार्यविषयेप्यनुमास्यामहे व्यतिरिक्तज्योतिर्निमित्तमेवेदं कार्यमिति अथाव्यतिरिक्तेनैव स्वात्मना ज्योतिषा राम॰
व्यवहरति ततोऽप्रत्यक्षेपि ज्योतिषि ज्योतिःकार्यदर्शनेऽव्यतिरिक्तमेव ज्योतिरनुमेयमथानियम एव व्यतिरिक्तमव्यतिरिक्तं वा १९१
ज्योतिः पुरुषस्य व्यवहारहेतुरित्यतोऽनध्यवसाय एव ज्योतिर्विषय इत्येवं मन्वानः पृच्छति जनको याज्ञवल्क्य किं ज्योतिरयं पुरुष इ
ति ॥ २ ॥

तमेवमभयं परिप्रापितो जनको याज्ञवल्क्येनागमतः संक्षेपतः पुनश्च जाग्रत्स्वप्नसुषुप्ततुरीयाद्वारेण प्रपञ्चस्यानम्यप्रसंगेनैवाथः प्रविविक्तेहा
रतमः सर्वे आरागाः स एष नेति नेतीति इदानीं जाग्रत्स्वप्नादिद्वारेणैव महता तर्केण विस्तरतोऽधिगमः कर्तव्यो ऽभयं प्रापयितव्यः सद्भावस्त्वा
त्मनो विवक्षितः पन्यासेन कार्यनिराकरणद्वारेण व्यतिरिक्तत्वं शुद्धत्वं स्वयंज्योतिष्ट्वमलुप्तशक्तिस्वरूपत्वं निरतिशयानन्दस्वाभाव्यम
द्वैतत्वं चाधिगन्तव्यमितीदमारभ्यते। आख्यायिका तु विद्यासंप्रदानग्रहणविधिप्रकाशनार्था विद्यास्तुत्यर्था च विशेषतो वरदानादि
सूचनात् जनकं ह वैदेहं याज्ञवल्क्यो जगाम स गच्छन्नेवं मेने चिंतितवान्न वदिष्ये किंचिदपि राज्ञे गमनप्रयोजनं तु योगक्षेमार्थेन
वदिष्य इत्येवं संकल्पोऽपि याज्ञवल्क्यो यज्जनकः पृष्टवांस्तत्तत्प्रतिपेदे तत्र को हेतुः संकल्पितस्यान्यथाकरणे इत्यत्राख्यायिका
माचष्टे पूर्वत्र किल जनकयाज्ञवल्क्ययोः संवाद आसीदग्निहोत्रे निमित्ते तत्र जनकस्याग्निहोत्रविषयं विज्ञानमुपलभ्य परितु
ष्टो याज्ञवल्क्यस्तस्मै जनकाय ह किल वरं ददौ स च जनको ह कामप्रश्नमेव वरं वव्रे तं च वरं हास्मै ददौ याज्ञवल्क्यस्तेन वरप्र
दानसामर्थ्येनाव्याविख्यासुमपि याज्ञवल्क्यं तूष्णीं स्थितमपि सम्राडेव जनकः पूर्वं पप्रच्छ तत्रैवावगतिर्ब्रह्मविद्यायाः कर्मणावि
रुद्धत्वाद्विद्यायाश्च स्वातंत्र्यात्मवतो हि ब्रह्मविद्यासहकारिसाधनान्तराणि स्युः ज्ञापयितुं स्पष्टार्थमेतावनेति च ॥ १ ॥

बृ॰टी॰ श्रीगणेशायनमः जनकोहवैदेहआसांचक्रेऽस्यसंबंधः शारीरायानंदोपसर्पाच्चिरतत्यजन्नस्यपुनर्हृदयेदिग्भेदेनचपुनःपंचसूक्ष्म
१८४ हृदयेयान्तत्यहृदयंशरीरंचपुनरन्योन्यप्रतिष्ठेप्राणादिपंचरूपात्मकेसमानान्स्येजगदात्मनिसूत्ररूपसंहृत्यजगदात्मानंश
रीरहृदयसत्त्वावस्थमतिक्रांतवान्मः ॐ पनिषदःपुरुषोनेतिनेतीतिव्याविर्भूस्साक्षाद्योपादानकारणस्वरूपेणाचनिर्दिष्टो
विज्ञानमानंदमितिब्रह्मसैषवागादिदेवताद्वारेणापुनरधिगमःकर्त्तव्यस्तस्य धिगमनोपायोविशार्थोपमारंभःआह्मणाद्वयस्याख्या
यिकात्वाचारप्रदर्शनार्थोजनकोहवैदेहआसनेकृतवानान्ह्यपिकोऽदृश्नवानित्यर्थःदर्शनकामेभ्योराजाथहतस्मिन्नवसरे

हरिः ॐ जनकोहवैदेहआसांचक्रेथहयाज्ञवल्क्यआववाजतंहोवाचयाज्ञवल्क्यकिमर्थमचारीःपशूनिच्छन्नण्वंतानितिउभय
मेवसंम्राडितिहोवाच १ ॥

याज्ञवल्क्यआववाजागतवानात्मनोयोगक्षेमार्थसप्तोवाथविविदिषार्थस्याऽनुग्रहार्थंतमागतंयाज्ञवल्क्यंयथावत्सत्कृत्योवाचहे राम॰
भगवान्जनकोहेयाज्ञवल्क्यकिमर्थमचारीआगतोसिकिंपशूनिच्छन्पुनरथाहोस्विदृएवंतान्सूक्ष्मांतान्सूक्ष्मवस्तुनिर्णयान १८४
नयत्रप्रान्समंतःश्रोतुमिच्छन्निजिज्ञ्यपमेवपस्तनयत्रामेहेसंम्राडितिवाजपेययाजिनोलिंगंयस्याज्ञयाराजंयशास्तिससंम्राट्तत
स्यांमंत्रणांहेसम्राडितितिसममस्यवाभारतस्यपस्याजा १ ॥ ॥

नरंचेदात्मानंदविषयोब्रह्मणोविज्ञानंतर्ह्येवतस्यस्वभावइत्यात्मानंदंविजानातीतिकल्पनानुपपन्ना अतोविज्ञानघसं
गोहिकल्पनायाअर्थवत्वेयथात्मानंपरंचवेत्तीतिनहिइछायासक्तमनसोनैरंतर्येणाप्युज्ञानकल्पनायाअर्थवत्वमथ
विद्धि त्वमात्मानंदंविजानातीतिविज्ञानस्यात्मविज्ञानछिद्रन्यविषयत्वप्रसंगः।आत्मनअविक्रियावत्वंनतत्स्थानिस्यत्वप्र
संगस्तस्माद्विज्ञानमानंदमितिस्वरूपान्व्याख्यानपरैवश्रुतिर्नात्मानंदसंवेद्यत्वार्थाउद्दृत्काउन्नेस्यादिश्रुतिविरोधोसं
वेद्यत्वश्रुतिचेन् नसर्वात्मैकत्वेयथाद्यात्मानुवादित्वाच्छुकेसस्सर्वात्मभावेसतियत्रक्वचिद्योगेषदेवेष्वाजन्दृगाफदिष्यासं
तयथाद्यामभेवानूद्यते।तत्रसेवस्सर्वात्मभावादितिसर्वात्मभावमोक्षस्तुतये यथाद्यात्मानुवादित्वेदुःखित्वमपीतिच
त्र यो गयादिषुयथाद्यात्मेजन्दृगादिवन्तस्थावरादिषुयथाद्यात्मदुःखित्वमपीतिचेत्।ना।नामरूपकृतकार्यकरणोपाधिसं
पर्कजनितभ्रांत्याध्यारोपितत्वात्सुखित्वदुःखित्वादिविशेषस्यपरिहृतैमेतत्सर्वंविरुद्धश्रुतीनांचविषयमवोचाम।तस्मा
देषोस्यपरमआनंदइतिवत्सर्वाणानंदवाक्यानिदृष्टव्यानि पंचमाध्यायस्यनवमंब्राह्मणं इतिश्रीमत्परमहंसपरिव्रा
जकाचार्य्य

ब्र॰ टी

१८३

183

वनेनाप्ययेऽज्ञोऽस्य मुदकस्य चौरस्यं न क्रियत एवं ज्ञापकत्वाद्वचनानां न चदेशांतरेऽग्निःशीत इति शक्यते ज्ञापयितुमगम्ये वा देशांतर
उष्णमुष्णकमिति। न प्रत्यगात्मन आनंदविज्ञानदर्शिनाता न विज्ञानमानं दृष्टमेवमादीनां वचनानां शीतोऽग्निरित्यादिवाक्यवत्त्वस्य कृत्यादि
विरुद्धार्थप्रतिपादकत्वमनुभूयाते त्वविरुद्धार्थतासुखमहमिति सुखात्मकमात्मानं स्वयमेव वेदयते। तस्मात्तत्परीक्षस्य कृत्याध
विरुद्धार्थता तस्मादानंदं ब्रह्म विज्ञानात्मकं सत्स्वयमेव वेदयते तथानंदप्रतिपादकाः श्रुतयः समंजसाः स्युर्जक्षन् क्रीडन् रममा
णाः इत्याद्याः पूर्वोक्ताः न कार्यकरणाभावेऽनुपपत्तेर्विज्ञानस्याशरीरवियोगो हि मोक्षः श्रोत्रेजिकशरीराभावे च करणानुपपत्ते
राश्रयाभावात्तत्र स्वविज्ञानानुपपत्तिरकार्यकरणत्वादेहाद्यभावे च विज्ञानोत्पत्तौ सर्वेषां कार्यकरणोपादानानर्थक्यप्रसंगः
कत्वविरोधाच्चापरं चेद्ब्रह्मानंदात्मकमात्मानं नित्यविज्ञानत्वान्नित्यमेव विजानीयान्नत्र संसार्यपि संसारविनिर्मुक्तस्याभाव्यप्रति
पद्येत जन्मनाशापदवीरकां जनिश्रितमोन पृथक्त्वेन व्यवतिष्ठते आनंदात्मकब्रह्मविज्ञानाय तदाख्यक आनंदात्मकमात्मानं वे
दयत इत्येतदनर्थकं वाक्यं अथ ब्रह्मानंदमन्यः सन्मुक्तो वेदयते प्रत्यगात्मानमहमस्यानंदस्वरूपइति तदैकत्वविरोधस्तथा च सति राम॰
सर्वश्रुतिविरोधस्तृतीया च कल्पना नोपपद्यते किं चान्यद्ब्रह्मणा स्वनिरंतरमात्मानंदविज्ञानैर्विज्ञानाविज्ञानकल्पनानर्थक्यान्निरं १८३

अत्रेदं विचार्यते। आनंदशब्दो लोके सुखवाची प्रसिद्धः अत्र च ब्रह्मणो विशेषणत्वेन आनंदशब्दः श्रूयते आनंदं ब्रह्मेति श्रुत्यंतरे चानंदो
ब्रह्मेति व्यजानात्· आनंदं ब्रह्मणो विद्वान्· यदेष आकाश आनंदो न स्यात्· यो वै भूमा तत्सुखमिति च· एष परम आनंद इत्येवमाद्याः।
संवेद्ये वस्तुरूपे आनंदशब्दः प्रसिद्धो ब्रह्मानंदस्य यदि संवेद्यः स्याद्युक्ता एते ब्रह्मण्यानंदशब्दाः। ननु च श्रुतिप्रामाण्यात्संवेद्यानंदस्व
रूपमेव ब्रह्म किं तत्र विचार्यमिति। न विरुद्धश्रुतिवाक्यदर्शनात्। स समानंदशब्दो ब्रह्मणि श्रूयते विज्ञानप्रतिषेधश्चैकत्वे प्रवृत्तस्य
सर्वमात्मैवाभूत्तत्केन कं पश्येद्विजानीयाद्यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किं
चन वेदेत्यादि विरुद्धश्रुतिवाक्यदर्शनात्तत्कर्तव्यो विचारस्तस्माद्युक्तं वेदवाक्यार्थनिर्णयाय विचारयितुं। मोक्षवादिविप्रतिप
त्तेश्च सांख्यवैशेषिकाश्च मोक्षवादिनो नास्ति मोक्षे सुखं संवेद्यमित्येवं प्रतिपन्नाश्च ये निरतिशयं सुखं वेद्यमिति। किं तावत्प्राप्तं मा
नंदादिश्रवणात् अहन्त्वी उ नरसमानाः स यदि पितृलोककामो भवति स सर्वज्ञः सर्ववित्सर्वान्कामान्समश्नुत इत्यादिश्रुतिभ्यो मोक्षे
सुखं संवेद्यमिति। न चैकत्वे कारकविभागाभावाद्विज्ञानानुपपत्तिः क्रियायाश्चानेककारकसाध्यत्वाद्विज्ञानस्य च क्रियात्वात्तानेषदो
षः शब्दप्रामाण्याद्वेद्विज्ञानमानंदविषयं विज्ञानमानंदमित्यादीन्यानंदस्वरूपस्यासंवेद्यत्वेऽनुपपन्नानि वचनानीत्यवोचाम ननु

जातएवेतिमन्यसेयदिकिमत्रप्रष्टव्यमितिजनिष्पत्तोहिसंभवःप्रष्टव्योनजातस्यायंतुजातएवातोस्मिन्विषयेप्रश्नएवनोपपद्यतइतिचे
न्न।किंतर्हिमृतःपुनरपिजायतएवान्यथाःकृताभ्यागमकृतनाशप्रसंगादतोवःपृच्छामिकोन्वेनंमृतंपुनर्जनयेत्तत्रविजज्ञुर्ब्राह्मणा
पनोमृतःपुनःप्ररोहतिजगतोमूलंनविज्ञातंब्राह्मणैरतोब्रह्मिष्ठत्वाद्धृतागावोयाज्ञवल्क्येनजिताब्राह्मणाःसमाप्ताख्यायिका।य
ज्जगतोमूलंयेनवशाद्देनमाज्ञातंमपदिश्यतेब्रह्मपदायाज्ञवल्क्येनब्राह्मणान्स्पष्टंवान्तत्स्वेनरूपेणाश्रुतिरसमस्पमाहाविज्ञानंविज्ञप्ति

जातएवनजायतेकोन्वेनंजनयेत्पुनः विज्ञानमानंदंब्रह्मरातिर्दातुःपरायणं तिष्ठमानस्यतद्विदइति नवमब्राह्मणं ९
इतिश्रीउपनिषत्कांडेतृतीयोध्यायः ३ २० ॥

विज्ञानंतत्रानेस्वनविषयविज्ञानवज्जडःस्यान्निरतिकिंतर्हिप्रसन्नंशिवमतुलमनायासंनित्यतृप्तमेकरसमित्यर्थः।किंतत्तब्रह्मोभयवि राम०
शेषणावच्छ्रतिःरातेःषष्ठ्यर्थेप्रथमाधनस्येत्यर्थः।धनस्यदातुःकर्मकृतोयजमानस्यपरमयनंपरागतिःकर्मफलस्यप्रदात्रीत्यर्थःकिं १८२
चव्युत्थायैषणाभ्यस्तस्मिन्नेवब्रह्मणितिष्ठत्यकर्मकृत्तत्तद्ब्रह्मवेत्तीतितद्विदस्तस्यतिष्ठमानस्यतद्विदोब्रह्मविद्इत्यर्थः।परायणमि
ति॥ २० ॥

यथदि वृक्षो वृक्णश्छिन्नो रोहति पुनः पुनः प्ररोहति प्रादुर्भवति मूलात्पुनर्नवतरः पूर्वस्मादिति नवतरीयदेतस्माद्विशेषणात्प्राग्वनस
तेः पुरुषस्य च सर्वं सामान्यमवगतमर्थं तद्वनस्पतौ विशेषो दृश्यते पश्छिन्नस्य प्ररोहणं न तत्पुरुषे मृत्युना वृक्णस्य पुनः प्ररोहणं दृश्य
ते भवितव्यं च कुतश्चित्प्ररोहणेन तस्मात्पृच्छामि मर्त्यो मनुष्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति मृतेस्य पुरुषस्य कुतः प्ररो

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति रेतस इति मा वोचत जीवतस्तत्प्रजाय
ते धानारुह इव वै वृक्षोंऽजसा प्रेत्य संभवः यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मू
लात्प्ररोहति १९ ॥ ७ ॥

हणमिति मर्त्यः यद्येवं वदथ रेतसः प्ररोहतीति मा वोचत मैवं वक्तुमर्हथ कस्माद्यस्माज्जीवतः पुरुषात्तद्रेतः प्रजायते न मृतादपि च धानारुहो धा
नाबीजं बीजरुहोपि वृक्षो भवति न केवलं कोऽरुहः एव वृक्षः शब्दो नर्थकः वै वृक्षोंऽजसा साक्षात्प्रेत्य मृत्वा संभवो भाना तो पि प्रेत्य संभवो
भवेदंजसा पुनर्वनस्पतेर्यदि सह मूलेन धानया वावृहेयुरुद्यच्छेयुरुत्पाटयेयुर्वृक्षं न पुनराभवेत्पुनरागमनं भवेत्तस्मात्पृच्छामि स
र्वस्यैव जगतो मूलं मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ १९

बृ॰ह॰ तेष्वप्रगल्भभूतेषु ब्राह्मणेषु तान्हृगतैर्वक्ष्यमाणैः श्लोकैः पप्रच्छ स्पष्टं वा मध्यालोके वृक्षो वनस्पतिर्वृक्षस्य विशेषणं वनस्पतिरिति तथैव पुरुषो
१८१ मृषा अमृषा सत्यमेतत्तस्य लोमानि तस्य पुरुषस्य लोमानीतरस्य वनस्पतेः पर्णानि त्वगस्योत्पाटिका बहिस्त्वक् अस्य पुरुषस्येतर
स्योत्पाटिका वनस्पतेस्त्वच एव सकाशादस्य पुरुषस्य रुधिरं प्रस्यन्दि वनस्पतेस्त्वच उत्पटस्त्वच एव उत्स्फटति यस्मादेवं सर्वं समानमेव
च वनस्पतेः पुरुषस्य च तस्मात्तदातृण्णाद्धिंसितात्प्रैति तद्रुधिरं निर्गच्छति वृक्षादिवाहतात् छिन्नात् इस एवं मांसानि अस्य पुरुषस्य वनस्प

तान्हैतैः श्लोकैः पप्रच्छ यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः त्वच एवास्य रुधिरं प्रस्य
न्दि त्वच उत्पटः तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात् मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरं अस्थीन्यन्तरतो दारू
णि मज्जा मज्जोपमा कृता १८ ॥ ७ ॥

मांसानि शकराणि शकलानीत्यर्थः किनाटं वृक्षस्य किनाटं नाम शकलेभ्योऽभ्यन्तरं वल्कलरूपं काष्ठसंलग्नं तत्स्नाव पुरुषस्य तत्स्थिरं त राम॰
था किनाटं स्नाववदृढं हि तदस्थीनि पुरुषस्य स्नाव्नोऽभ्यन्तरतोऽस्थीनि भवन्ति तथा किनाटस्याभ्यन्तरतो दारूणि काष्ठानि मज्जा मज्जैव १८१
वनस्पतेः पुरुषस्य च मज्जोपमा कृता मज्जाया उपमा मज्जोपमा नान्यो विशेषोऽस्तीत्यर्थः यथा वनस्पतेर्मज्जा तथा पुरुषस्य यथा पुरुषस्य त
था वनस्पते १८ ॥ ७ ॥

(81)

तं तोषयित्वं शाकल्यो न मेने ह न विज्ञातवान्किल तस्य ह मूर्द्धा विपपात विपतितः समाप्ताख्यायिका श्रुतेर्वचनं तं ह न मेने इत्यादि किं चापि हास्य
परिमोषिणस्तस्कराश्चास्थीन्यपि संस्कारार्थं शिष्यैर्नीयमानानि गृहान्प्रत्यपजह्रुरपहृतवन्तः किं निमित्तमन्यद्धनं नीयमानं मन्यमानाः
प्रवृत्ताख्यायिके ह संचिताख्यायिकां किल शाकल्येन याज्ञवल्क्यस्य समानान्त एव किल संवादो निर्वृत्तस्तत्र याज्ञवल्क्येन शापो दत्तः
पुरेऽतिथ्ये मरिष्यसि न तेऽस्थीनि च गृहान्प्राप्स्यन्तीति स ह तथैव ममार तस्य हाप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुः तस्मा
न्नोपवादी स्यादुत ह्येवंवित्परो भवतीति सैषाख्यायिकाचारार्थं स विता विद्यास्तुतये चेह यस्मिन्नेति नेतीत्यस्य त्रिविधश्रावेरा ब्रह्मणा
तं ह न मेने शाकल्यस्तस्य ह मूर्द्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः अथ होवाच ब्राह्मणा भगवन्तो यो वः का
मयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ १७ ॥

निर्द्धारितस्तस्य विधिमुखेन कथं निर्द्देशः कर्त्तव्य इति पुनराख्यायिकामेवाश्रित्याह मूलं च जगतो वक्तव्यमित्याख्यायिकासंबंधस्तत्र ब्रह्म
विदो ब्राह्मणान्जित्वा गोधनं हर्त्तव्यमिति न्यायं मत्वाहात्र वाचा अथ यानन्तरं तस्मिन्भूते ब्राह्मणेषु ह स्वाचष्टे ब्राह्मणा भगवन्त इत्येवं
बोधयो वो युष्माकं मध्ये कामयते इच्छति स मा मागत्य पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते
तेषां अन्यो मां पृच्छत्विति तं वः पृच्छामि सर्वान्वा वो युष्मानहं पृच्छामीति ते ह ब्राह्मणा न दधृषुस्ते ब्राह्मणा एवमुक्ता अपि न प्रगल्भाः संवृत्ताः किं
विदपि प्रत्युत्तरं वक्तुं ॥

बृ॰टी॰
१८०

180

ऽगृह्यो न गृह्यत इत्यर्थं यस्मात्सर्वकार्यधर्मातीतस्तस्मादगृह्यः कुतो यस्मान्न हि गृह्यते यद्धि करणगोचरं व्याकृतं वस्तु तद्ग्रहणगोचरं इ-
दं तु तद्विपरीतमात्मतत्वं तथाशीर्यो यद्धि मूर्तं संहतं शरीरादि तच्छीर्यते ऽयं तु तद्विपरीतोऽतो न हि शीर्यते। असंगो मूर्तो मूर्तांतरेण संब-
ध्यमानः सज्यतेऽयं च तद्विपरीतोऽतो न हि सज्यते तथाऽसितः अबद्धो यद्धि मूर्तं तद्बध्यते इदं तु तद्विपरीतत्वादबद्धत्वान्न व्यथतेऽतो न रिष्य-
ति प्रहरणाशरणासंगर्वधकार्यधर्मरहितत्वान्न रिष्यति न हिंसामापद्यते न विनश्यतीत्यर्थः। क्रममतिक्रम्यौपनिषदस्य पुरुषस्याख्या-
यिकातोऽपसृत्य स्वेन रूपेण श्रुत्या निर्देशः कृतः। ततः पुनराख्यायिकामेवाश्रित्याह एतानि यान्यष्टावायतनानि पृथिव्ये-

ऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसंगो न हि सज्यतेऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पु-
रुषाः स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति २६॥७॥

व यस्यायतनमित्येवमादीन्यष्टौ लोका अग्निर्लोका इत्यादयोऽष्टौ देवा अमृतमित्याहोवाचेत्येवमादयोऽष्टौ पुरुषाः शारीरः पुरुष इत्यादयः स यः क-
श्चित्तान्पुरुषाञ्छारीरप्रभृतीन्निरुह्य निश्चयेनोह्य गमयित्वा प्रत्युह्य क्रमेण लोकस्थितिमुपपाद्य पुनः प्राच्यादिदिग्द्वारेणानुप्रविश्य स्वा- राम॰ १८०
त्मनि हृदये अत्यक्रामदतिक्रान्तवानुपाधिधर्मं हृदयाद्यात्मत्वं स्वेनैवात्मनोऽवस्थितो य औपनिषदः पुरुषोऽशनायादिवर्जित उपनिषत्स्वे-
व विज्ञेयो नान्यप्रमाणगम्यस्तं त्वा त्वां विद्याभिमानिनं पुरुषं पृच्छामि तं चेद्यदि मे न विवक्ष्यसि विस्पष्टं न कथयिष्यसि मूर्धा ते विपतिष्यतीति २६

हृदयशरीरयोरेवमन्योन्यप्रतिष्ठत्वात्कार्यकरणयोरतस्त्वां पृच्छामि कस्मिन्नु त्वं च शरीरमात्मा च तव हृदयं प्रतिष्ठितौ स्थ इति प्राण इति
देहात्मानौ प्राणे प्रतिष्ठितौ स्यातां प्राणवृत्तौ कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति सापि प्राणवृत्तिः प्रागेव प्रेयादपानवृत्त्या चेन्न नि-
गृह्येत कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति साप्यपानवृत्तिरध एव यायात्प्राणवृत्तिश्च प्रागेव मध्यस्थया चेद्व्यानवृत्त्या न निगृ-

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इ- ॥
ति कस्मिन्न्व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति स एष नेति नेत्यात्मा ॥ १५ ॥ ८

गृह्येत कस्मिन्नु व्यानः प्रतिष्ठित इति उदान इति सर्वास्तिस्रोऽपि वृत्तयः उदाने कीलस्थानीये वद्धा विष्वगेयुः कस्मिन्नूदानः प्रतिष्ठि-
त इति समाने इति समाने प्रतिष्ठा ह्येताः सर्वा वृत्तयः एतदुक्तं भवति शरीरहृदयवायवोऽन्योन्यप्रतिष्ठाः संघाते न नियता वर्त्तन्ते विज्ञानम-
यार्थप्रयुक्ता इति सर्वमेतद्येन नियतं यस्मिन्प्रतिष्ठितमाकाशान्तमोतं च प्रोतं च तस्य निरुपाधिकस्य साक्षादपरोक्षाद्ब्रह्मणो निर्देशः
कर्तव्य इत्ययमारंभः स एषः स यो नेति नेतीति निर्दिष्टो मधुकाण्डे एष स योपमात्मा ॥ १५ ॥ ॥ ॥

बृ॰ह॰ किंदेवतः कादेवता अस्य तव दिग्भूतस्य सोहि याज्ञवल्क्यो हृदयात्मानं दिक्षु पंचधा विभक्तं दिगात्मभूतं तद्द्वारेण सर्वं जगदात्मत्वेनोपगम्याहमस्मि
१७७ दिगात्मेति व्यवस्थितः पूर्वाभिमुखः सप्रतिष्ठाकवचनाद्यथा याज्ञवल्क्यास्य प्रतिज्ञातं तथैव पृच्छति किंदेवतस्त्वमस्यां दिश्यसीति सर्वत्र हि वेदे यां यां देवता
177 मुपास्ते इहैव तद्भूत्वा तां तां प्रतिपद्यत इति तथा च वक्ष्यति देवो भूत्वा देवानप्येतीति अस्यां प्राच्यां का देवता दिगात्मनस्तवाधिष्ठात्री कया देवत
यात्वं प्राचीदिग्रूपेण संपन्न इत्यर्थः इतर आहादित्यदेवत इति प्राच्यां दिशि मम दिगात्मनो देवता सोहमादित्यदेवतः स देवा इत्येतदुक्तं सप्रतिष्ठ

किंदेवतोस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्वि
ति चक्षुषा हि रूपाणि पश्यति १० ॥

इति वचनात्वस्मिन्नाह स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति अध्यात्मं चक्षुष आदित्यो निष्पन्न इति हि मंत्रब्राह्मणवादाः चंद्रमा मनसो जा राम॰
तश्चक्षोः सूर्यो अजायत चक्षुष आदित्य इत्यादयः कार्यं हि कारणे प्रतिष्ठितं भवति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति रूपग्रहणाय हि रू १७७
पात्मकं चक्षू रूपेण प्रयुक्तं यैर्हि रूपैः प्रयुक्तं तैरात्मग्रहणाय सृष्टं चक्षुस्तस्मात्सादित्यं चक्षुः सह प्राच्या दिशा सह तत्स्थैः सर्वैः रूपेषु प्रतिष्ठितं च
क्षुषा सह प्राचीदिक सर्वा रूपभूता ॥१८

अष्टधादेवलोकपुरुषभेदेनत्रिधात्रिधात्मानंप्रविभज्यव्यवस्थितःएकैकोदेवःआगणभेदएवोपासनार्थंव्यपदिष्टोधुनादिग्विभागेनपंचधाप्रविभक्तस्या
त्मनउपसंहारार्थमाहतूष्णींभूतेशाकल्येयाज्ञवल्क्योग्रहेणेवावेशयन्नाहशाकल्येतिहोवाचयाज्ञवल्क्यस्त्वांस्विदितिवितर्कयन्इमेनूनंब्राह्म
णाःअंगारावक्षयणमंगाराःअवदह्यंतेयस्मिन्संदंशादौतदंगारावक्षयणंतन्नूनंत्वामकृतकृतवंतोब्राह्मणाःत्वंतन्नबुध्यसेआत्मानंम

शाकल्येतिहोवाचयाज्ञवल्क्यस्त्वांस्विदिमेब्राह्मणाअंगारावक्षयणमक्रताउइतियाज्ञवल्क्येतिहोवाचशाकल्यो
यदिदंकुरुपंचालानांब्राह्मणानत्यवादीःकिंब्रह्मविद्वानितिदिशोवेदसदेवाःसप्रतिष्ठाइतियद्दिशोवेत्थसदेवाः
सप्रतिष्ठाः ९ ॥ ॥ ॥ ॥

यादह्यमानमित्यभिप्रायःयाज्ञवल्क्येतिहोवाचशाकल्योयदिदंकुरुपंचालानांब्राह्मणानत्यवादीरत्यक्रान्तवानसिस्वयंभीतास्त्वामंगारावक्षय
णंकृतवंतइतिकिंब्रह्मविद्वान्सन्नेवमधिक्षिपसिब्राह्मणान्याज्ञवल्क्यआहब्रह्मविज्ञानंतावदिदंममकिंतद्दिशोवेददिग्विषयंविज्ञानंजाने
तच्चनकेवलंदिशएवसदेवाःदेवैःसहदिगधिष्ठातृभिःकिंचसप्रतिष्ठाःप्रतिष्ठाभिश्चसहइतरआहयद्दिशोवेत्थसदेवाःसप्रतिष्ठाइतिसफलं
यदिविज्ञानंत्वयाप्रतिज्ञातं॥ ९ ॥

बृ॰टी॰ तमेवयस्यायतनंतमन्नतिशाकर्वराधंधक्कारःपरिगृह्यते आध्यात्मं छायामयो ज्ञानमयः पुरुषस्तस्य का देवतेति मृत्युरिति होवाच मृत्युरकरषिर्देवं तं तस्य नि
१७६ ष्पत्तिकारणं। रूपाण्येव यस्यायतनं पूर्ववसाधारणानि रूपाणि कानि इह तु प्रकाशकानि विशिष्टानि रूपाणि गृह्यन्ते रूपायतनस्य देवस्य विशे
षायतनं प्रतिविंवाधारमादर्शो पसृरिति होवाच तस्य प्रतिविंवात्मस्य पुरुषस्य निष्पत्तिरसोः आगाततं। आप एव यस्यायतनं साधारणाः स
तमस्य वयस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्व
स्यात्मनः परायणं यमात्थ य एवायं छायामयः पुरुषः स एष देव शाकल्य तस्य का देवतेति मृत्युरिति होवाच रूपाण्येव यस्यायतनं च
क्षुर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं
यमात्थ य एवायमादर्शे पुरुषः स एष देव शाकल्य तस्य का देवतेत्यसुरिति होवाच आप एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं
पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स
एष देव शाकल्य तस्य का देवतेति वरुण इति होवाच रेत एव यस्यायतनं हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः प
रायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ य एवायं पुत्रमयः पुरुषः स एष देव शाकल्य तस्य
मर्गो आपः आयतनं वापीतडागाद्याश्रयास्तु विशेषायतनं तस्य का देवतेति वरुण इति वरुणात्संघातकर्त्रो\\ का देवतेति प्रजापतिरिति होवाच ८
आत्ममाय एव वा व्याख्यायते निष्पत्तिकारणं रेत एव यस्यायतनं य एवायं पुत्रमयो विशेषायतनं रेतआयतनस्य पुत्रमय इति अस्थिमज्जाशुक्राणि पित
ॐतानि तस्य का देवतेति प्रजापतिरिति होवाच प्रजापतिः पिताच्यते पितृतो हि पुत्रस्योत्पत्तिः ८

कामएवयस्यायतनं स्त्रीव्यतिकराभिलाषः कामः कामशरीरइत्यर्थः हृदयं लोको हृदयेन बुद्ध्या पश्यतीतियएवायं काममयः पुरुषो ध्यात्ममपि काममय
एवतस्य कादेवतेति स्त्रियइति होवाच स्त्रीतो हि कामस्य दीप्तिर्जायते। रूपाण्येवयस्यायतनं रूपाणि शुक्लकृष्णादीनि यएवासावादित्ये
पुरुषः सर्वेषां हि रूपाणां विशिष्टं कार्यमादित्ये पुरुषस्तस्य कादेवतेति सत्यमिति होवाच सत्यमिति चक्षुरुच्यते चक्षुषो ध्यात्मनः आदित्यस्या

कामएवयस्यायतनं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं स
र्वस्यात्मनः परायणं यमात्थ यएवायं काममयः पुरुषः सएषवदेव शाकल्य तस्य कादेवतेति स्त्रियइति होवाच रूपाण्येवयस्यायतनं चक्षुर्लो
को मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमा
त्थ यएवासावादित्ये पुरुषः सएषवदेव शाकल्य तस्य कादेवतेति सत्यमिति होवाच आकाशएवयस्यायतनं श्रोत्रं लोको मनोज्योति
र्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ यएवायं श्रो
श्चिदेवतस्य निष्पत्तिः। आकाशएवयस्यायतनं \ त्रः प्रातिश्रुत्कः पुरुषः सएषवदेव शाकल्य तस्य कादेवतेति दिश इति होवाच ७ ॥ ॥
राएवायं श्रोत्रेभवः श्रोत्रस्तत्रापि प्रातिश्रवणवेलायां विशेषतो भवतीति प्रातिश्रुत्कस्तस्य कादेवतेति दिश इति होवाच दिग्भ्यो ह्यसावाध्यात्मिको निष्प
द्यते॥७॥

वृ॰टी॰
१६७
167

कस्मात्पुनः कारणात्पृथिव्यादिदेवता महाभागाः सत्यो मनुष्यादिवदात्मनि तिष्ठंतमात्मनो नियंतारमंतर्यामिणं न विदुरित्यत आह । अदृ
ष्टो न दृष्टो न विषयीभूतश्चक्षुर्दर्शनस्य कस्यचित्स्वयं तु चक्षुषि सन्निहितत्वाद्दृशिस्वरूप इति द्रष्टा तथाऽश्रुतः श्रोत्रगोचरत्वमनाप
न्नः कस्यचित्स्वयं त्वलुप्तश्रवणशक्तिः सर्वश्रोत्रेषु संनिहितत्वाच्छ्रोता तथाऽमतो मनःसंकल्पविषयमनापन्नः दृष्टश्रुते एव हि
सर्वः संकल्पयत्यदृष्टत्वादश्रुतत्वादेवामतोऽलुप्तमननशक्तित्वात्सर्वमनःसु संनिहितत्वाच्च मंता तथाऽविज्ञातो निश्चयगोचरम

दृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मंताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति विज्ञातैष त आत्मांत
॥ र्याम्यमृतोऽतोऽन्यदार्त्तं ततो होद्दालक आरुणिरुपरराम ७ सप्तमं ब्राह्मणं ॥

नापन्नो रूपादिवत्तदृस्वादिवद्वा स्वयं त्वलुप्तविज्ञानशक्तित्वात्तत्संनिधानाच्च विज्ञाता तत्र यं पृथिवी न वेद यं सर्वाणि भूतानि न विदु
रित्येवमादिनियंतव्या विज्ञातारोऽन्ये नियंता तर्यामीति प्राप्तं तदन्यत्वाशंकानिवृत्यर्थमुच्यते नान्योऽतोऽन्यः अतः अस्मादंतर्या
मिणो नान्योऽस्ति द्रष्टा तथा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मंता नान्योऽतोऽस्ति विज्ञाता यस्मात्परो नास्ति द्रष्टा श्रोता मंता विज्ञाता राम॰
योऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मंताऽविज्ञातो विज्ञाताऽमृतः सर्वसंसारधर्मवर्जितः सर्वसंसारिणां कर्मफलविभागकर्तैष त आ १६७
त्मांतर्याम्यमृतोऽस्मादीश्वरादात्मनोऽन्यदार्त्तं ततो होद्दालक आरुणिरुपरराम ७ पंचमस्य सप्तमं ब्राह्मणं ॥ ७ ॥

अथाधिभूतंभूतेषुब्रह्मादिस्तंबपर्यंतेष्वंतर्यामिदर्शनमधिभूतमथाध्यात्मंयःप्राणेप्राणोवायुसहितेघ्राणेयोवाचिचक्षुषिश्रोत्रेम

यःसर्वेषुभूतेषुतिष्ठन्सर्वेभ्योभूतेभ्योंतरोयंसर्वाणिभूतानिनविदुर्यस्यसर्वाणिभूतानिशरीरंयःसर्वाणिभूतान्यंतरोयमयत्येषत
आत्मांतर्याम्यमृतइत्यधिभूतमथाध्यात्मम् यःप्राणेतिष्ठन्प्राणादंतरोयंप्राणोनवेदयस्यप्राणःशरीरंयःप्राणमंतरोयमय
